आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

## अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्

आरा (विहारः)

त्रिंशं वर्षम्-प्रथमोऽङ्कः

मार्च 2022

## ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्क-मपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 9431451895,
   Email-**nilmanipathak19@gmail.com**

   **( ii ) बैंक ड्राफ्ट ‘संस्कृतप्रसारपरिषद्’** इति नाम्ना
   आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. ‘आरण्यक’सम्बद्धा सर्वविधा जिज्ञासा
    **प्रो. गोपबन्धु मिश्रः, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी ( उ.प्र. )-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
    Email-**gopabandhuh@gmail.com**
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
    Email-**aranyakam94@gmail.com** इति सङ्केतेन विधातव्यः।

# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता


वर्षाङ्कौ - त्रिंशं वर्षम् - प्रथमोऽङ्कः

**चैत्रः, वि.सं. २०७९**

**मार्च २०२२**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः - विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 50 रूप्यकाणि* *वार्षिकं शुल्कं 100 रूप्यकाणि*

*संयुक्ताङ्कः - 100 रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

❀

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❀

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
कुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

❀

सह-सम्पादकौ
**डॉ. सञ्जय कुमार चौबे**
sanjaychaubey.lbs@gmail.com
**डॉ. सुनीलकुमार प्रधानः**
sunilkumarp435@gmail.com

❀

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

❀

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

**चतुर्विधा भजन्ते मा जनाः सुकृतिनोऽर्जुन।**
**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।** (गीता 7/16)

इति गीतोक्तिः। भजनप्रवृत्तिशीला जना अत्र चतुर्धा विभक्ताः, ते च 'सुकृतिनः' इति विशेषेण विशिष्टाः। अर्थात् सत्सु अनेकेषु प्राणिषु मनुष्यस्यैव भजने प्रवृत्तौ क्षमता, किं च तेष्वपि अनेकेषु जनेषु – ये सुकृतिनो भवन्ति ते एव एतैः चतुर्विधैः विभक्ता भवितुमर्हन्ति, तच्च भगवद्भजनप्रवृत्तिप्रसङ्गे एवेति भावोऽत्र स्पष्टो भवति। इतरप्राणिवत् मनुष्या अपि आर्ता भवन्ति। ते च पुनः आध्यात्मिकाधिदैविकाधिभौतिकेति तापत्रयाक्रान्ता भवन्ति, तेभ्यः मुक्तये ईश्वरं भजन्ति। श्रीमद्भागवते मङ्गलविधौ उक्तमस्ति–

**सच्चिदानन्दरूपाय विश्वोत्पत्त्यादिहेतवे।**
**तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः।।**

अर्थात् त्रिविधतापतप्ताः मनुष्याः तद्विनाशाय ईश्वरं नमन्ति।

एवमेव आर्तता शरीरं मनः भौतिकं वस्तु वा आश्रित्य उद्भवति। ततोऽपेक्षया द्वितीयस्य भजनशीलस्य 'जिज्ञासु' इत्यस्य जनस्य प्रवृत्तिः ज्ञानमेवाश्रयते, 'ज्ञातुम् इच्छति' जिज्ञासते, ज्ञातुम् इच्छुः = जिज्ञास + उ (सनाशसंभिक्ष उः, अ. 3.2.168) = जिज्ञासुः इति व्युत्पत्तेः। इयं जिज्ञासुता सृष्टेः उदयकालात् अद्यावधि मानवेषु विद्यमानाऽस्ति। बाल्यावस्थातः जिज्ञासा उत्पद्यन्ते, किं च क्रमशः अध्ययनकाले, ततः परम् उद्योगेषु, पारिवारिकतायाम्, सामाजिकतायां विविधदेशकालादिगतास्ववस्थासु अनेका जिज्ञासा उत्पद्यन्ते। तासु जिज्ञासासु एका प्रौढा प्रगाढा च जिज्ञासा सृष्टेः प्रारम्भत आदाय इदानीमपि उज्जीवन्ती अस्ति– अहं कः? कुत आयातः? इतः परं कुत्र गतिरित्यादिः। तस्या आदिमं प्रमाणम् ऋग्वेदस्य नासदीयसूक्ते (10/128) लभ्यते–

**नासदासीन्नो सदासीत् तदानीं**
**नासीद्रजो नो व्योमापरो यत्।**
**किमावरीवः कुह कस्य शर्मन्–**
**नम्भः किमासीद् गहनं गभीरम्।।** इत्यादि।

तत आरभ्य 'अथातो ब्रह्मजिज्ञासा' इत्यादौ जिज्ञासाक्रमः नानारूपैः दृश्यमानोऽस्त्येव।

‘तादृशजिज्ञासायाः समाधानमपि **ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्** (ईशावास्योपनिषद्,1) इत्यादौ अन्विष्टं सदपि

**नायमात्मा प्रवचनेन लभ्यो**

**न मेधया न बहुधा श्रुतेन।** (कठोपनिषद्)

इत्यादौ सुतराम् अनिर्वचनीयतामात्मनि आधत्त इत्येतदपि उररीकृतमेव। तच्च–

**आश्चर्यवत् पश्यति कश्चिदेनम्**

**आश्चर्यवद् वदति तथैव चान्यः।**

**आश्चर्यवच्चैनमन्यः शृणोति**

**श्रुत्वाप्येनं वेद न चैव कश्चित्।।** (गीता 2/29)

इत्यादौ रहस्याख्यायिकतोपपादनैः विजृम्भितमस्ति। एवमेव तदवाप्तये श्रवण–मनन–निदिध्यासनप्रक्रियाः तथा च ज्ञान–भक्ति–कर्म–राजादियोगाः उपायत्वेन समुपस्थापिताः सन्ति। एतेन एतस्य जिज्ञासावादस्य निरन्तरता तथा च अनन्तता सुतरां द्योत्यत एव। अर्थात् एतेन क्रमेण भजनशीलेषु तुरीयां ‘ज्ञानी’ इत्याख्यां कोटिम् अवाप्तुं विविधैः साधकैः मनीषिभिः मुनिभिः स्वयं यत्नो विधीयमानस्तथा च अपरेषां कृते विविधा मार्गाः दर्श्यमानाः सन्तीति जिज्ञासाया एष क्रमो न केवलं सुदीर्घोऽपि तु सुमहानिति वक्तुं शक्यते।

तत्र च यथा **ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि मे पार्वती**’ति भिक्षाप्रार्थनाप्रसङ्गे ज्ञानवैराग्यसिद्धिरिति भिक्षाविषयः भिक्षार्थिनः शङ्करस्य कमपि स्तरविशेषं ध्वनयति, तथैव आत्मतत्त्वं जिज्ञासमानानामत्र बौद्धिकस्तरः स्वयमेवात्मनः उन्नततरत्वं द्योतयत्येव। अन्यथा जागतिके जगति सामान्यतः न्यूनेन समयेन अधिकाधिकार्थसम्पादनविषये भोग्यवस्तूनां नानाविधपरिग्रहावसरप्रसङ्गे तद्विध-देहाभिमानाश्रितेतरपराजयात्मविजयादिविधौ वा जिज्ञासाः प्रवर्तन्त एव। एतादृशा भौतिकभोगवादविषयाणां मोहजन्यतामभिलक्ष्यैव भगवत्पादः आदिश्रीशङ्कराचार्यः कञ्चिद् मुद्गरप्रहारं विदधत् गायति–

**भज गोविन्दं भज गोविन्दं**

**गोविन्दं भज मूढमते।**

**प्राप्ते तु सन्निहिते मरणे**

**न हि न हि रक्षति डुकृञ् करणे।।**

(अत्र ‘डुकृञ् करण’ इति प्रयोगः तद्विध–भौतिकपरिग्रहस्य प्रातिनिध्यं भजतीति कथयितुं शक्यते)।

एवमेव **'तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्'** इत्युपनिषद्वचसि कस्यचिदपरस्य धने लोलुपतायाः सहजताऽपि सङ्केतिता, किन्तु तत्र त्यागस्य श्रेयस्त्वमित्य-नुशासितम्। अर्थात् भौतिकजीवने ऐहिकानां विषयाणाम् आकर्षणे सत्यपि कुत्र कस्मिंश्च विषये जिज्ञासा विधेयेति प्रसङ्गे कृत्याकृत्यप्रवृत्तिनिवृत्तिसाधिका विवेकशक्तिरेव प्रमाणमिति आस्माकीना परम्परा। कठोपनिषद्यपि श्रेयसः प्रेयसश्चेति उभयोः संमिश्रात्मके जगति प्रेयसः अपेक्षया श्रेयसः स्वीकरणे धीरत्वमेव प्रमाणमिति स्पष्टतयोक्तमस्ति। धीरत्वस्य लक्षणमप्यन्यत्र उक्तमस्ति, तद्यथा–

**विकारहेतौ सति विक्रियन्ते**
**येषां न चेतांसि त एव धीराः।**

अतः महाभारते **का वार्ता, किमाश्चर्यम्** इत्यादीनां प्रश्नानां पाण्डवाग्रजेन युधिष्ठिरेण **दण्डेन कालः पचतीति वार्ता, शेषा स्थावरमिच्छन्ति किमाश्चर्यमतः परम्** इत्यादीनि उत्तराणि यया रीत्या प्रस्तुतानि, तैः मूलजिज्ञासितानां प्रश्नानां वैशिष्ट्यम् अनतिसाधारण्यं च सुस्पष्टं भवति।

एवमेव यथा घटपटादिज्ञानस्याधिकरणं मनः, तथा स्थूल–सूक्ष्म–कारणाद्यवस्थायां विद्यमानानां भावानां विषये जिज्ञासायाः अधिकरणमपि मन एव। यथा मनसः स्तरः स्थितिश्च तथा तादृशी जिज्ञासा उत्पद्यते। अत एव उत्तमोत्तमचिन्तनस्य उत्तमोत्तमजिज्ञासायाश्च उद्भावनं यथा स्यात् तदर्थं मनसः स्थिरता एकाग्रता शास्त्रेषु विविधेषु च ग्रन्थेषु बहुधा ऊहिताऽस्ति। शुक्लयजुर्वेदस्य शिवसंकल्पसूक्ते **'तन्मे मनः शिवसंकल्पमस्तु'** इत्युक्तौ मनसः शिवसंकल्पताऽभ्यर्थिता। ऐतरेयोपनिषदि **'वाङ् मे मनसि प्रतिष्ठिता, मनो ने वाचि प्रतिष्ठितम्'** इत्युक्तौ वाचोऽधिकरणरूपेण मनसो विवृतौ यथा मनः तथैव वाक् इति संकेतितम्। गीतायामपि मनसः स्थिरताविषयिणम् उपायं प्रदर्शयता भगवतोक्तम्–

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।**
**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।।** (गीता 6/26)

अत उत्तमोत्तमप्रश्नानां प्रस्तुतौ निर्विकारम् इहामुत्रफलभोगविरक्तं नचिकेत आदेः मनः उत्तमाधिकरणरूपेण यद् दृश्यमानमस्ति, तत् प्रमाणरूपेण द्रष्टुं शक्यते। महात्मनः दुरात्मनश्च लक्षणं विवरीतुकामेन सुभाषितेनापि मनसः अधिकरणत्वं सुतराम् आद्यतया प्रस्तूय तस्य महत्त्वं सम्यक् प्रदर्शितमस्ति, तद्यथा –

**मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।**
**मनस्यनद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम्।।**

एवमेव अन्न–प्राण–मनो–विज्ञानानन्देषु पञ्चसु कोषेषु मनोमयस्य कोषस्य माध्यस्थ्यं दर्शितम्, अर्थात् पूर्वस्य अन्न–प्राणेति कोषद्वयस्यापेक्षया एष मनोमयः कोष उत्तरतां भजते, स च पुनः विज्ञानानन्देति कोषद्वयस्य हेतुकतां निर्वहति। तैत्तिरीयोपनिषदि उपर्युक्ताः पञ्च अन्नादयः ब्रह्मपदवाच्या उक्ताः, तत्र तेन क्रमेण **'मनो ब्रह्मेति व्यजानादि'**ति उक्तम्। अतः मनसः इतरेन्द्रियाणाम् अवयवानां चापेक्षया महत्त्वम् आत्यन्तिकतया विज्ञातुं शक्यते।

वर्णोच्चारणप्रक्रियायामपि विवक्षाकारणेन बुद्ध्या समेत्य आत्मा मनः योजयतीत्युक्तमस्ति पाणिनीयशिक्षायाम्, तदित्थम् –

**आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।**
**मारुतस्तूरसि चरन् मन्द्रं जनयते स्वरम्॥**

अत एव क्रमेण विविधव्यवहारविषये नानाविधज्ञानाहरणप्रसङ्गे जिज्ञासावादस्य विकासयात्रायां च मनुष्यस्य अन्तरिन्द्रियं मनो महत्त्वं बिभर्ति। मनस्वी, मुनिः, मनीषा, मनोरथः इत्यादयो विविधाः शब्दा भिन्न–भिन्न–महत्त्वं विवर्णयन्तः प्रयुज्यमानाः दृश्यन्ते, तथा च –

**मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम्॥**
**मन एव मनुष्याणां कारणं बन्धमोक्षयोः॥**

इत्यादयोऽनेकाः सूक्तयः मनसो वैशिष्ट्यसंधारिकाः लोकेषु प्रसिद्धाः सन्ति।

'आरण्यकस्य' सद्योऽङ्को मनस्विनां कतिपयानां विदुषाम् अध्यवसायप्रसूतान् शोधलेखान् आदाय प्रवर्तमानोऽस्ति। तत्र व्याकरणसम्बद्धाः दार्शनिकतत्त्वगताश्च लेखाः स्थानं लभमानाः सन्ति। मध्ये–मध्ये 'किञ्चिद् रामायणीयम्' इति शीर्षकेण वाल्मीकि-रामायणगतानां रामादिचरित्रविशेषाणां स्वभावादिविषयगताः केचन प्रसङ्गा बिन्दुशः संगृहीताः प्रदत्ताः सन्ति।

एष आरण्यकस्याङ्कः विदुषां मनसि नानविधजिज्ञासासमाधानाय किं च नूतन-नूतनजिज्ञासोत्पादनाय च हेतुभूततया प्रवर्तिषीष्टेति मनसोऽस्माकम् अभिलाषेति शम्।

गोपबन्धु मिश्र
सम्पादकः

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. पुरस्तादपवादन्यायविषयक-व्याडिमतसमीक्षणम् | डॉ. पङ्कजकुमारव्यासः<br>सहाचार्यः, व्याकरणविभागः,<br>राष्ट्रियसंस्कृतविश्वविद्यालयः,<br>तिरुपतिः (आन्ध्रप्रदेशः)-517507 | 1-7 |
| 2. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 8 |
| 3. अद्वैतवेदान्ते बन्धस्वरूपविर्शः | वाचस्पतिशास्त्री जोशी<br>शोधच्छात्रः, संस्कृतविभागः<br>कर्णाटक विश्वविद्यालयः<br>धारवाड (कर्णाटकम्) | 9-14 |
| 4. विकरणविवेकः | सुस्मिता साहा<br>अध्यापिका, संस्कृतम्<br>श्रीचैतन्यमहाविद्यालयः<br>हावडा, कोलकाता | 15-24 |
| 5. घेरण्डसंहिताग्रन्थे दैहिक-शुद्धिप्रक्रियाविमर्शः | डॉ. स्वप्न माल<br>एसोसियट प्रोफेसर, संस्कृतविभागः<br>राइगंज विश्वविद्यालय, दीनापुर<br>(पं. बंगाल) | 25-36 |
| 6. प्रणववादस्य अभिनवता | सेविका-नाग<br>सहायकाचार्या, अद्वैतवेदान्तः,<br>प्राच्यविद्याविभागः,<br>संस्कृतमहाविद्यालयविश्वविद्यालयः,<br>कलकाता | 37-55 |
| 7. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 56 |

| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 8. | **अर्थवत्सूत्रे अधातुग्रहण-प्रयोजनम्** | सौमित्र आचार्यः<br>शोधच्छात्रः, संस्कृतदर्शनविभागः,<br>रामकृष्णमिशन-विवेकानन्द-<br>शैक्षणिकशोधसंस्थानम्,<br>बेलुडमठम्, कोलकाता | 57-64 |


***

# पुरस्तादपवादन्यायविषयकव्याडिमतसमीक्षणम्

**डॉ. पङ्कजकुमारव्यासः**

तत्र नागेशोपाध्यायः परिभाषेन्दुशेखरे ग्रन्थारम्भे प्रतिज्ञावाक्ये वस्तुनिर्देशेन व्याख्यास्यमानपरिभाषाणां स्वरूपं परिभाषयन् प्राचीनवैयाकरणतन्त्रे वाचनिकानि, अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्त इत्याह।[1] अनेन वचनेन ज्ञायते यदिमाः परिभाषा न केवलं पाणिनीयतन्त्र एव शास्त्रोपकारकत्वेन समाद्रियन्तेऽपितु ततः पूर्वतनव्याकरणतन्त्रेऽपि शास्त्रनिर्णयप्रसङ्गे एताः समाद्रियन्ते स्म, तथैव ततः पश्चाद्वर्तिभिश्चापि व्याख्याता भिन्नरूपेण। अतः एतासां व्याख्यानप्रसङ्गे दृश्यन्ते मतमतान्तराणि व्याख्यातृणाम्, एवमेव ज्ञापकादिविषयेऽपि सन्ति मतभेदाः। तत्र व्याडि–शाकटायन–चान्द्र–कातन्त्र–कालाप–हेमचन्द्र–पुरुषोत्तमदेव–सीरदेव-नीलकण्ठ–नागेश–शेषाद्रिसुधीप्रभृतिभिः इमाः परिभाषाः स्वस्वमतरीत्या भाष्यप्रमाणोपन्यास-पुरस्सरं व्याख्याताः। तत्र न केवलं व्याख्यान एव भेदः परिलक्ष्यते परिभाषाणाम्, अपितु परिभाषास्वरूपेऽपि पाठभेदो दृश्यते बहूनाम्। तेषु क्वचित् कैश्चिद् भाष्यकारहृदयम-विज्ञायैव अन्यथा व्याख्यातम्, तेन तत्तद्व्याख्याकृन्मतदूषणं बहुधा दृश्यते नागेशस्य परिभाषेन्दुशेखरे। बहुत्र सीरदेव–नीलकण्ठ–व्याडिप्रभृतीनां नाम अस्वीकृत्यापि केचित्तु इत्यादिना निराक्रियन्ते एतानि मतानि नागेशेन भाष्यविरुद्धत्वात्। अस्मिन् व्याकरणशास्त्रे नागेशस्य वैदुष्यं को वा न वेत्ति? भाष्यकारहृदयप्रकाशने न कश्चित् समर्थस्तथा यथा नागेशः। अत एव भाष्यकार–भर्तृहर्योरनन्तरमयमेव प्रमाणत्वेन मन्यते विद्वद्भिः पदार्थनिर्णये। एताश्च परिभाषाः क्वचिन्न्यायरूपेण क्वचिच्च वचनरूपेणापि पठिताः, अतः न्याय इत्यपि व्यवहारः एतासाम्। प्रकृते लेखेऽस्मिन् **''पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्''**[2] इति परिभाषाव्याख्याने व्याडिमतं प्रथमतः निरूप्य तदुक्तज्ञापकादिविषयं समालोचयामः।

**अयमत्र व्याडिग्रन्थः**[3] **–** कथं ज्ञायते। यदयं 'सेऽसिचि कृतचृतच्छृदतृदनृतः'[4]

इति चृतः से परतः वा इट्-प्रतिषेधं शास्ति। नृतः श्यन्विकरणस्यापवादः। नैवास्य विकरणः प्राप्नोति नार्थः इट्प्रतिषेधेन। एतत्पश्यति आचार्यः पुरस्तादपवादः अनन्तरमेव शपं बाधते न श्यन्विकरणमिति पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते इति। किमेतस्या ज्ञापने प्रयोजनम्। **'विभाषा दिक्समासे.'**[5] इत्यत्र बहुव्रीहिग्रहणं प्रत्याख्यायते। ततोऽनन्तरवचनं **'न बहुव्रीहौ'**[6] इति प्रतिषेधो विभाष्यते। **'द्वन्द्वे च'**[7] इत्यसौ न विभाष्यते दक्षिणोत्तरपूर्वाणामिति।

**समीक्षा**

अत्र समीक्षायां चत्वारोंऽशा विद्यन्ते। 1. परिभाषाज्ञापकत्वपरिशीलनम्, 2. नृतः श्यन्विकरणस्यापवादः इति पङ्क्तेः पुरस्तादपवादन्यायविषयत्वपरिशीलनम्, 3. नैवास्य विकरणः प्राप्नोति इत्यादिपङ्क्तेरर्थसङ्गतिः, 4. एतस्याः (परिभाषायाः) ज्ञापने उक्तप्रयोजनसङ्गतिश्चेति।

1. परिभाषाया ज्ञापकत्वपरिशीलनम्, 2. नृतः श्यन्विकरणस्यापवादः इति पङ्क्तेः पुरस्तादपवादन्यायविषयत्वपरिशीलनञ्च –

परिभाषाया अस्या व्याडिमते ज्ञापकं भवति **''सेऽसिचि कृतचृतच्छृदतृदनृतः''**[8] इति सूत्रे चृतः से परतः विकल्पेन इट्–प्रतिषेधः इति। सूत्रेणानेन एतेभ्यो धातुभ्यः परः सिज्भिन्नो य आर्धधातुकः सादिः प्रत्ययः तस्य विकल्पेन इड् विधीयते। सकारादि–आर्धधातुकप्रत्ययग्रहणेन स्य–विकरणस्य सन्–प्रत्ययस्य च ग्रहणं भवति। सिजपि सकारादिस्तथापि तस्य तु असिचि इति पर्युदास उक्त एव। पाणिनिना प्रकृतसूत्रे ये धातवः पठिताः तेषु नृती (1116) गात्रविक्षेपे इति दिवादौ, चृती (1324) हिंसाश्रन्थनयोः इति तुदादौ, कृती (1435) छेदने इति तुदादौ, उ छृदिर् (1445) दीप्तिदेवनयोः इति रुधादौ, उ तृदिर् (1446) हिंसानादरयोः रुधादौ, कृती (1447) वेष्टने रुधादौ पठिताः। कृत इत्यनेन तौदादिकरौधादिकयोर्ग्रहणम्। प्रकृते पाणिनिना कादिवर्गाणां क्रमेण धातवो निर्दिष्टाः। अत्र व्याडिः ''सेऽसिचि कृतचृतछृदतृदनृतः'' इति सूत्रे चृतः से परतः विकल्पेन इट्-प्रतिषेधो ज्ञापकमिति अकथयत्। ततः **नृतः श्यन्विकरणस्यापवादः। नैवास्य विकरणः प्राप्नोति नार्थः इट्–प्रतिषेधेन। एतत्पश्यति आचार्यः पुरस्तादपवादः अनन्तरमेव शपं बाधते न श्यन्विकरणमिति पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते इति** कथयति।[9]

**अस्यायमाशयः –** नृतः श्यन्विकरणस्यापवादः स्यः। स च पुरस्तादपवादन्यायेन

लृटि लृङि च शपं बाधित्वा प्रवर्तते। शब्विधेरनन्तरं श्यनादयो विधयः पठिताः। अत एव अग्रिमपङ्क्तौ व्याडिनोक्तम् – पुरस्तादपवादः अनन्तरमेव शपं बाधते न श्यन्विकरण-मित्यादि।

वस्तुतस्तु नायं पुरस्तादपवादन्यायस्य विषयः। भवति ह्ययं येन नाप्राप्तन्यायविषयः।[10] यतः शबादिविधिषु अवश्यप्राप्तेषु यः स्यविधिः आरब्धः स शबादिविधीनामपवादो भवति। "**स्यतासी लृलुटोः**"[11] इति निरवकाशः सन् अपवादो भवति इति तु न वक्तुं शक्यम्। एकत्र शपं बाधित्वा अन्यत्र तस्य चारितार्थ्यस्य वक्तुं शक्यत्वात्। तेन न केवलं शबेव बाध्यते अपितु अन्येऽपि। एवञ्च स्वविषये यद्यत् प्राप्नोति तावत्सर्वं बाध्यते इति बाध्यसामान्यचिन्तया[12] लृटि लृङि च तत्तद्गणीयविकरणप्रत्ययान् बाधित्वा स्यः एव प्रवर्तते। इत्येतावता किमायातमिति चेत् स्यविधिः स्वाव्यवहितं शपमेव बाधते न तु तद्व्यवहितान् श्यनादीनपि इति व्याडिमतम्। तथा सति शपं बाधित्वा प्रवृत्तः स्यः श्यनादीन् न बाधेत, तच्च महदनिष्टम्। अनेन नृतः श्यन्विकरणस्यापवादः इति व्याडेः स्ववचोव्याघातः। कुत इति चेद् नृतः श्यन्विकरणस्यापवादः स्यविधिः येन नाप्राप्तन्यायेनैव भवितुमर्हति न तु पुरस्तादपवादन्यायेन। तेन परिशील्यमानेन येन नाप्राप्तन्यायेन स्यविधिः सर्वेषां विकरणविधीनां बाधकः।

अत्र नृतः श्यन्विकरणस्यापवाद इति पङ्क्तेः प्राक्तनो ग्रन्थो लुप्त इति भाति। यतः कथं ज्ञायते इत्यारभ्य प्रवर्तमाने व्याडिग्रन्थे यदयं "**सेऽसिचि कृतचृतछृदतृदनृतः**"[13] इति से परतः वा इट्–प्रतिषेधं शास्ति इति ग्रन्थात् परं साक्षात् **नृतः श्यन्विकरणस्यापवादः** इति पङ्क्तेः पौर्वापर्यं न घटते।

**नैवास्य विकरणः प्राप्नोति इत्यादिपङ्क्तेरर्थसङ्गतिः –**

एवमेव **नैवास्य विकरणः प्राप्नोति नार्थः इट्–प्रतिषेधेन** इत्यत्रापि अर्थसङ्गतौ क्लेशः। यतो नैवास्य विकरणः प्राप्नोति इत्यस्य तु एवमर्थो वक्तुं शक्यः – अस्य नृत्– धातोः लृटि लृङि वा नैव विकरणः प्राप्नोति नाम तद्गणीयो विधीयमानः श्यन् न प्राप्नोति, अपवादेन स्येन बाधितत्वात्। तथैव अन्येषामपि धातूनाम्। परन्तु नार्थः इट्–प्रतिषेधेन इति तु न युक्तं भाति। यतः **सेऽसिचि** इत्यादिसूत्रे सर्वेषामपि उदात्तत्वात् नित्यमिटि प्राप्ते इट्–प्रतिषेधो विकल्प्यः। अन्यथा नित्यमिटि प्रवर्तमाने इड्विशिष्टं रूपमेव स्याद्, अपेक्षते तु इड्रहितमपि रूपम्। अतो विकल्पेन इट्–प्रतिषेधेन अस्त्येव प्रयोजनम्।

यद्वा नैवास्य विकरणः प्राप्नोति, नार्थः इट्–प्रतिषेधेन इत्यस्य स्थाने **नार्थः इट्–**

**प्रतिषेधे न** इति वा पठित्वा ग्रन्थः सङ्गमनीयः। तेन अर्थसङ्गतिर्भवति – इट्–प्रतिषेधे कृते नार्थः इति न, अर्थात् अवश्यमेव प्रयोजनमस्तीति।

एवमपि ग्रन्थे समन्विते आलोचितयोः द्वयोः अंशयोः प्रथमः अंशः **चृतः से परतः विकल्पेन इट्–प्रतिषेधः** कथंकृत्वा ज्ञापक इत्येतद्विषयकः प्रश्नस्तु तिष्ठत्येव। यतः ज्ञापकं हि व्यर्थं सत् ज्ञापयति। प्रकृते चृतः से परतः विकल्पेन इट्–प्रतिषेधो न केनापि प्राप्नोति। प्राप्ते हि अन्येन पुनर्विधानं ग्रहणं वा व्यर्थं सत् ज्ञापयेत्। प्रकृते तु न तथा। चृतः अपि उदात्तत्वात् नित्यमेव इट् स्यात् आर्धधातुके परे। तस्य च प्रकृतसूत्रेण संकोचः क्रियते सिज्भिन्नस्य सादेरार्धधातुकस्य इट् विकल्प्यते। अन्यत्र आर्धधातुके लुडादिषु नित्यमेवेट्। तस्मात् कथमपि चृतः से परतो वा इट्–प्रतिषेधो ज्ञापकं भवितुं नार्हति, तस्य स्वतः चारितार्थ्यात्।

**एतस्याः ( परिभाषायाः ) ज्ञापने उक्तप्रयोजनसङ्गतिः -**

इदानीं पुरस्तादपवादा इत्यस्याः परिभाषाया ज्ञापने किं प्रयोजनम्? तत् सङ्गच्छते न वेति? इत्ययमंशः परिशीलनीयः। तत्र व्याडिः **''किमेतस्या ज्ञापने प्रयोजनम्। विभाषा दिक्समासे. इत्यत्र बहुव्रीहिग्रहणं प्रत्याख्यायते। ततोऽनन्तरवचनं 'न बहुव्रीहौ' इति प्रतिषेधो विभाष्यते। 'द्वन्द्वे च' इत्यसौ न विभाष्यते दक्षिणोत्तरपूर्वाणामिति''**[14] इत्यादिग्रन्थेन परिभाषाया ज्ञापने प्रयोजनमाह।

अस्यायमाशयः ''विभाषा दिक्समासे बहुव्रीहौ'' (1.1.28), ''न बहुव्रीहौ'' (1.2.29), ''द्वन्द्वे च'' (1.1.31) इत्यस्ति क्रमोऽष्टाध्याय्याम्। तत्र विभाषा ''दिक्समासे बहुव्रीहौ'' इति सूत्रं **''दिङ्गमायन्तराले''**[15] इति सूत्रविहितप्रतिपदोक्तदिक्समासे सर्वनामसंज्ञां विकल्पेन विधत्ते। उत्तरपूर्वस्यै, उत्तरपूर्वायै इत्याद्युदाहरणम्। ततो ''न बहुव्रीहौ'' (1.2.29) इति बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञां निषेधति। त्वकं पिता यस्य स त्वत्कपितृक इत्याद्युदारहणम्। इह समासात् प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। ततो ''द्वन्द्वे च'' (1.1.31) इति सूत्रं द्वन्द्वे सर्वनामसंज्ञां निषेधति। वर्णाश्च आश्रमाश्च इतरे च वर्णाश्रमेतराः, वर्णाश्रमेतराणाम् इत्याद्युदाहरणम्। अत्र ''विभाषा दिक्समासे बहुव्रीहौ'' (1.1.28) इति सूत्रेण सर्वनामता विभाष्यते (विकल्प्यते), परन्तु तदनन्तरवचनेन ''न बहुव्रीहौ'' (1.1.29) इत्यनेन बहुव्रीहौ चिकीर्षिते सर्वनामता निषेध्यते। तर्हि अनन्तरमुक्त-त्वात् सर्वत्रापि सर्वनामसंज्ञा निषेधः प्राप्नोति। तथा सति पूर्ववचनेन विकल्पो व्यर्थ एव स्यात्। अतो ''विभाषा दिक्समासे बहुव्रीहौ'' इति विभाषा अवश्यप्राप्तनिषेधे सति आरब्धा

तस्मात् ''न बहुव्रीहौ'' इति निषेधे बाधित्वा प्रवर्तते। परन्तु दिक्समासस्य स्वतः बहुव्रीहि-विशिष्टत्वात् (''दिङ्नामान्यन्तराले'' इत्यनेन विशिष्य विहितत्वात्) अत्र सूत्रे बहुव्रीहिग्रहणं न कर्तव्यम्। तथा सति द्वन्द्वे अतिप्रसङ्गः स्यात् (द्वन्द्वे मा भूत् - दक्षिणोत्तरपूर्वाणामिति– इति भाष्यम्)। यथा ''न बहुव्रीहौ'' इति अवश्यप्राप्ते प्रतिषेधे आरब्धेयं विभाषा ''न बहुव्रीहौ'' इति प्रतिषेधं बाधते तथैव ''द्वन्द्वे च'' इत्येतमपि बाधेत (तेन द्वन्द्वसमासे सर्वनामसंज्ञाविकल्पो न प्रवर्तेत, निषेध एव प्रवर्तेतेत्यर्थः) इति शङ्का भाष्यकृता कृता। तदा भाष्ये न बाधते इत्यादिना एवं समाहितम् – न बाधते। किं कारणम्? येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते ''न बहुव्रीहौ'' इत्येतस्मिन् प्रतिषेधे इयं विभाषा आरभ्यते, ''द्वन्द्वे च'' इत्येतस्मिन् पुनः प्राप्ते चाप्राप्ते।[16] अत्र प्राप्ते चाप्राप्ते च इत्यस्यायमर्थः – यदि ''द्वन्द्वे च'' इति सूत्रेण प्राप्तनिषेधेऽपि ''विभाषा बहुव्रीहौ'' इति सूत्रेण विकल्पः प्रवर्तेत, तर्हि ''विभाषा जसि'' इति सूत्रेण द्वन्द्वसमासे जसि सर्वनाम-संज्ञाविकल्पो निरर्थकः स्यात्। अतः येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको (अपवादो) भवतीति न्यायेन इयं विभाषा ''न बहुव्रीहौ'' इत्यसैव बाधिका न तु ''द्वन्द्वे च'' इत्यस्यापि। तेन नार्थो बहुव्रीहिग्रहणेन। अनया रीत्या एतद्भाष्यमाधृत्यैव व्याडिनोक्तम्– ''विभाषा दिक्समासे' इत्यत्र बहुव्रीहिग्रहणं प्रत्याख्यायते।

एतदुत्तरं द्वन्द्वे प्रतिषेधातिप्रसक्तिवारणाय बहुव्रीहिग्रहणावश्यकपरभाष्यस्य समाधान-बाधकान्तरभाष्ये (''विभाषा दिक्समासे'' इत्यत्र बहुव्रीहिग्रहणप्रत्याख्यानपरभाष्ये) – अथवा ''पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते, नोत्तरान्'' इत्येवमियं विभाषा ''न बहव्रीहौ'' इत्येतं प्रतिषेधे बाधिष्यते, ''द्वन्द्वे च'' इत्येतं प्रतिषेधं न बाधिष्यते। ततः पुनः – अथवा इदं तावदिदं प्रष्टव्यम् – इह कस्मान्न भवति – या पूर्वा सोत्तरा अस्योन्मुग्धस्य सोऽयं पूर्वोत्तर उन्मुग्धः, तस्मै – पूर्वोत्तराय देहीति? लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति इत्यादि भाष्येण[17] बहुव्रीहिग्रहणं प्रकृतसूत्रे नापेक्ष्यते द्वन्द्वे तु प्रतिपदोक्तत्वाभावात् नास्य प्रतिषेधस्य प्रसक्तिरिति स्पष्टमुक्तम्। तथापि उत्तरार्थम् (न बहुव्रीहौ) इत्येतदर्थं तु अपेक्ष्यत एव इत्युक्तम्। परन्तु तद्धि एकदेशिभाष्यम्। तस्य भाष्यस्यैकदेशित्वन्तु स्पष्टं प्रदीपाद्योतयोः।[18] तत्त्वे तत एव ग्राह्यम्। एवञ्च प्रकृतसूत्रे बहुव्रीहिग्रहणं प्रत्याख्यातमिति व्याड्युक्तं सम्यगेव।

**उपसंहारः**

एवञ्च पुरस्तादपवादा इत्यादिपरिभाषाया व्याडिकृतं व्याख्यानस्य समीक्षा-मित्थमुपसंजिहीर्षामि – (1) परिभाषाया ज्ञापकत्वपरिशीलनम्, (2) नृतः श्यन्विकरणस्या-

पवादः इति पङ्क्तेः पुरस्तादपवादन्यायविषयत्वपरिशीलनम् इत्यनयोर्विषये इदं वक्तव्यं यत् व्याडिना ''सेऽसिचि कृतचृत ...'' इत्यत्र चृतः से परतः इट्प्रतिषेधो ज्ञापकमित्यादि यदुक्तं तदसङ्गतमेव। यतः नायं पुरस्तादपवादन्यायस्य विषयः, भवत्ययं येन नाप्राप्तन्याय-विषय इति विस्तरेण प्रत्यपाद्यमस्माभिः उपरि अस्मिन् लेखे। अत्र नृतः श्यन्विकरणस्या-पवाद इति पङ्क्तेः प्राक्तनो ग्रन्थो लुप्त इति भाति। यतः कथं ज्ञायते इत्यारभ्य प्रवर्तमाने व्याडिग्रन्थे यदयं ''सेऽसिचि कृतचृतछृदतृदनृतः'' इति से परतः वा इट्-प्रतिषेधं शास्ति इति ग्रन्थात् परं साक्षात् नृतः श्यन्विकरणस्यापवादः इति पङ्क्तेः पौर्वापर्यं न घटते, इत्यपि सयुक्तिकं प्रत्यपादि। ततः **( 3 ) नैवास्य विकरणः प्राप्नोति इत्यादिपङ्क्तेरसङ्गतिः** विषये इदं वक्तव्यम् – **नैवास्य विकरणः प्राप्नोति नार्थः इट्-प्रतिषेधेन** इत्यनेन 'इट्-प्रतिषेधेन नार्थः' इति न युक्तम्, तस्य इट्-प्रतिषेधविकल्पेन इड्विहितरूपस्यापेक्षारूपकारणात्, अर्थसङ्गतौ विपरीतार्थप्रतीतेश्च। अथवा ''नार्थ इट्प्रतिषेधेन'' इत्यस्य **प्रतिषेधे न** इति भङ्क्त्वा 'इट्-प्रतिषेधे नार्थ इति न' इति नञ्द्वयं प्रयुज्य अवश्यमेव प्रयोजनमस्तीति व्याडिग्रन्थः समर्थनीयः। न्यरूपीदमपि उपरिष्टादस्माभिः। तदुत्तरमन्ते **( 4 ) एतस्याः ( परिभाषायाः ) ज्ञापने उक्तप्रयोजनसङ्गतिः** इति विषयपर्यालोचनेनेदमायाति यत् भाष्यप्रमाणोपन्यासेन पुरस्तादपवादन्यायविषये किमेतस्या ज्ञापने प्रयोजनमित्यादिना सम्यगेव प्रोक्तम्। तथापि इदन्त्ववधेयम् – ''विभाषा दिक्समासे'' इत्यत्र बहुव्रीहिग्रहणप्रत्याख्यानविषयः, तत्प्रत्याख्यातेऽपि ''द्वन्द्वे च'' इत्यत्र नातिप्रसक्तिः अस्य प्रतिषेधस्य पुरस्तादपवादन्यायेन इति साधु व्याख्यातं व्याडिना। परन्तु नृतः श्यन्-विकरणस्यापवाद इति प्रसङ्गे पुरस्तादपवादः अनन्तरमेव शपं बाधते न श्यन्वि-करणमित्यादिना पुरस्तादपवादन्यायविषयोऽयमित्येतस्मिन् विषये तु व्याडिः भ्रान्त एव। एतस्य येन नाप्राप्तविषयत्वात्, समीक्षितमिदं समीक्षायामुपरि **परिभाषाया ज्ञापकत्व-परिशीलनम्** इत्यस्मिन् प्रथमे प्रघट्टे।

एतावता स्वमनीषया भाष्यकैयटोद्द्योतादिग्रन्थपरिशीलनपुरस्सरं **''पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते''** इति व्याडिकृतपरिभाषासूचनाख्ये ग्रन्थे उक्तो विषयः समीक्ष्य विदुषां पुरतः समुपस्थापितः। समीक्षणस्य युक्तायुक्तत्वविषये सुधियः प्रमाणम्।

*

**सन्दर्भाः–**

1. परिभाषेन्दुशेखरः, पृ.1
2. परिभाषेन्दुशेखरः परिभाषा 60, व्याडिकृतपरिभाषसूचने परिभाषा 9
3. परिभाषासङ्ग्रहे व्याडिकृतपरिभाषासूचनम्, पृ.7
4. अष्टाध्यायी 7.2.57
5. विभाषा दिक्समासे बहुव्रीहौ (अष्टा. 1.1.28)
6. अष्टा. 1.1.29
7. अष्टा. 1.1.31
8. अष्टा. 7.2.57
9. परिभाषासङ्ग्रहे व्याडिकृतपरिभाषासूचनम्, पृ.7
10. येन नाप्राप्ते यो विधिराभ्यते स तस्य बाधको (अपवादः) भवति (पभिाषेन्दुशेखरे परिभाषा 58)
11. अष्टा. 3.1.33
12. स्वेतरसकलशास्त्रबाधकतैव बाध्यसामान्यचिन्तेति व्यवह्रियते। परिभाषेन्दुशेखरस्य बालबोधिनी-व्याख्याने, पृ.360
13. अष्टा. 7.2.57
14. परिभाषासङ्ग्रहे व्याडिकृतपरिभाषासूचनम्, पृ.7
15. अष्टा. 2.2.26
16. महाभाष्ये "विभाषा दिक्समासे बहुव्रीहौ" 1.1.28 इति सूत्रे पृ.335
17. तत्रैव सूत्रे भाष्ये, पृ.336
18. तत्रैव सूत्रे भाष्ये, प्रदीपोद्द्योतयोः, पृ.336-337

*

## किञ्चिद् रामायणीयम्

**रावणेनापहृता सीता रावणस्याग्रतः रामं प्रशंसन्ती 'अहं राममनुव्रता' इत्याह। कीदृशं रामम्?**

- महागिरिम् इव अकम्प्यम्।
- महेन्द्रसदृशम्।
- महोदधिम् इव अक्षोभ्यम्।
- सर्वलक्षणसम्पन्नम्।
- सत्यसन्धम्।
- महाबाहुम्
- सिंहविक्रान्तगामिनम्
- सिंहसंकाशम्
- राजवत्सम्
- पृथुकीर्तिम्।
- न्यग्रोधपरिमण्डलम्।
- महाभागम्
- महोरस्कम्
- नृसिंहम्
- पूर्णचन्द्राननम्
- जितेन्द्रियम्

**रावणस्याग्रतः दाशरथेः रावणस्य च मध्ये अन्तरं सीता वर्णयति। तदित्थम्–**

| | **रामः** | **रावणः** |
|---|---|---|
| वने | सिंहः | श्रृगालः |
| | समुद्रः | स्यन्दनिका |
| | सुराग्र्यः | सौवीरकः |
| | काञ्चनम् | सीसलोहम् |
| | चन्दनम् | वारिपङ्कम् |
| वने | हस्ती | विडालः |
| | वैनतेयः | वायसः |
| | मयूरः | मद्गुः |
| वने | हंसकः | गृध्रः |

आधारः – रामायणम्

अरण्यकाण्डम् 47 सर्गः

# अद्वैतवेदान्ते बन्धस्वरूपविमर्शः

**वाचस्पतिशास्त्री जोशी**

इह खलु दुःखजम्बालनिमग्नाः जनाः धर्मार्थकममोक्षाख्येषु नित्यं मोक्षाख्यमेव पुरुषार्थं कामयन्ते। यो हि फलमिच्छति स तत्साधने प्रवर्तते। साधनमन्तरा फलस्य प्राप्तेः अशक्यत्वात्। अतः संसारकारणीभूतस्य मोक्षप्रतिबन्धकस्य अज्ञानस्य निवृत्तिरावश्यकी। निमित्तापाये हि कार्याभावः छत्रापाये इव छायापायः। तथा च संसारनिमित्तज्ञानस्य निवर्तकम् आत्मज्ञानं तच्च शास्त्रेण भवतीति शास्त्रमधिगन्तुं यतन्ते मुमुक्षवः।

**बन्धशब्दार्थः**

बध्यते जन्तुरनेनेति व्युत्पत्त्या बन्धशब्देन संसारकारणीभूतं कर्म विवक्षितं भवति। कर्मणैव हि खलु जन्तुर्लभते जन्म समाप्ते चोपभोगे म्रियते। अत एव भाष्ये भगवत्पादैरभिहितम् उत्पत्तिविनाशलक्षणः संसार इति तथा च बन्धः संसारः इत्यादिशब्दाः पर्यायवाचिनः।

लोके च शब्दाः फलं तत्कारणोभयपरतया प्रयुज्यमाना दृष्टाः। यथा अर्थापत्त्यादिपदानि। तत्र च अर्थस्यापत्तिरिति व्युत्पत्त्या फलवाचित्वं, अर्थस्यापत्तिर्यया इति व्युत्पत्त्या करणपरत्वम्। तथा बन्धादिशब्दाः। रागद्वेषमोहादिदोषैः बन्धनमेव बन्धः इति फलपरत्वे। बध्यते जीवः अनेनेति करणव्युत्पत्त्या च बन्धकारणीभूतकर्मपरत्वं बन्धशब्दस्य।

**बन्धस्य अनादित्वम्**

संसारस्य अनादित्वमवश्यमेवाङ्गीकार्यम्। तस्य अनादित्वे श्रुति–स्मृति–युक्तयः प्रमाणानि भवन्ति। तथा हि संसारः यद्यादिमान् भवेत् तदा सः किञ्चित्कारणसापेक्षमेव उत्पद्यत इत्यवश्यमेवाङ्गीकार्यम्। अन्यथा आकस्मिकत्वापत्तेः। न चेष्टापत्तिः निर्निमित्तस्य कार्यस्य असम्भवात्। अतः नानाविधवैचित्र्ययुक्तस्य संसारस्य कारणं किञ्चिद्वक्तव्यमेव। तच्च कर्मैव स्वीकार्यम्, अन्यस्यासम्भवात्। तथा च कर्मवैचित्र्यप्रयुक्तं संसारवैचित्र्यम्।

अत्र यद्यपि ईश्वरः संसारकारणत्वेन स्वीकर्तुं शक्यते। तथा च संसारवैचित्र्यकारणत्व-मप्यङ्गीकर्तव्यम्, तदा विषमसृष्टिजनकत्वादीश्वरस्य रागद्वेषादियुक्तपामरजनसादृश्यापत्तिः। यो विषमकारी स दोषवानिति व्याप्तिदर्शनात्। **न चेष्टापत्तिः निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं**[1]**, समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति मे प्रियः**[2] इत्यादि स्वच्छस्वभावप्रतिपादकश्रुति–स्मृतिकोपः स्यात्। अतः केवलस्य ईश्वरस्य जनकत्वे दोषः स्यात्, न च तथास्ति। तथा हि, यथा पर्जन्यं सामान्यं कारणं, क्वचिदङ्कुरोत्पत्तिवैषम्ये तु बीजगतान्येव असाधारणानि गुणजातानि कारणानि, तद्वदेव ईश्वरोऽपि सामान्यकारणमेव, वैषम्ये च जीवगतान्येव कर्माणि कारणानीति न ईश्वरः वैषम्यादिदोषैर्दुष्यति। तथा च कर्मसहकारेणैव ईश्वरः सृष्टिं जनयतीति शरीराद्युत्पत्तेः प्राक् कर्मणः सत्त्वं स्वीकार्यम्, अन्यथा सृष्टेः पूर्वं विषमसृष्टिजनकत्वात् पूर्वोक्त एव दोषः।

किञ्च केवलायाः अविद्यायाः अपि वैषम्यकारणत्वं न स्वीकर्तुमुचितम्। तस्याः एकरूपत्वात्। अतः साप्यविद्या राग–द्वेष–मोहादिरूपाः ये क्लेशाः तेषां वासनाभिः आक्षिप्तानि धर्माधर्मादिरूपाणि कर्माणि तैः सहकृतैव कार्यकारिणी। सृष्टेः सादित्वे आद्यशरीरोत्पत्तिरेव न स्यात्, कारणाभावात्। न च तत्र कर्मणः कारणत्वं सम्भवति, कर्मणः शरीरजन्यत्वात् शरीरस्य च कारणं कर्म एवेति परस्परमन्योन्याश्रयवारणार्थं सर्वैरेव बीजाङ्कुरस्थले यथा बीजजन्मनः अङ्कुरस्यादावुत्पत्तिर्वा अङ्कुरात् बीजोत्पत्तिरित्यत्र नियामकाभावात् अनादित्वस्य सिद्धिस्तद्वदेवात्रापि जन्मकारणीभूतस्य कर्मणः कर्मकारणीभूतस्य जन्मनः वा पूर्वमुत्पत्तिरित्यत्र नियामकाभावादत्रापि बीजाङ्कुरन्यायेनैव संसारस्य अनादित्वं स्वीकार्यम्।

किञ्च संसारस्य कारणीभूता अविद्या, अविद्यावानेव मनुष्यः संसरति न तु निवृत्ताविद्यः। तथा च अज्ञानरूपायाः अविद्यायाः अनादित्वात् अविद्याकृतः सुखदुःखाद्युपभोगलक्षणः संसारोऽपि अनादिरिति युज्यते। तथा च श्रुति–स्मृति–युक्तीनां बलात् संसारस्यानादित्वं सिद्ध्यति। तथा ऐहिकामुष्मिकजन्मनि देहादिसङ्घाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवरूपः संसारः, अनादिः अनाद्यविद्याकृतत्वात् इत्यनुमानेनापि तस्य अनादित्व-सिद्धिः।

अत्र यद्यपि संसारातिरिक्ते अविद्याकृतत्वं नास्तीति हेतोः पक्षमात्रवृत्तित्वात् अन्वयदृष्टान्तो न लभ्यते। अतः व्यतिरेकेण व्याप्तिर्ग्राह्या। ब्रह्मणि अनाद्यविद्याकृतत्वाभावस्य सत्त्वेऽपि अनादित्वभावः न लभ्यते तस्य अनादित्वादिति कथं व्यतिरेकव्याप्तिः, तथापि स्वरूपतः प्रवाहतश्च अनादित्वं द्विविधं दृष्टम्, अत्र च ब्रह्मणि स्वरूपतः अनादित्वसत्त्वेऽपि प्रवाहतः

अनादित्वं नास्ति। तस्य संसारमात्रनिष्ठत्वात्। अतः प्रवाहतः अनादित्वाभाव–अनाद्यविद्या-कृतत्वाभावयोः ब्रह्मणि ग्रहात् व्याप्तिलाभः।

अथवा जन्मान्तरे मम संसारानुभवः अस्ति इह जन्मनि जायमानस्मरणजनकत्वात्। अद्यतनीयघटादिस्मरणजनकघटाद्यनुभवात्। एवम् उत्तरजन्मनि संसारो भविष्यति इह जन्मनि मया संसारस्यानुभूयमानत्वात्। पूर्वजन्मानुभूतसंसारी यथा इह जन्मन्यासीत् तद्वत्। अनुभवजन्यसंस्कारपूर्विका हि स्मृतिः। अतः एतादृशानुमानप्रयोगः अप्यत्रानुसन्धेयः। अत्र यद्यपि अनुमाने जन्मान्तरीयसंसारस्य अतीन्द्रियतया इदानीं तस्य स्मरणं न शक्यं वक्तुं, तथापि योगिनां योगबलेन तस्य वक्तुं शक्यत्वात्। यथा वा स्तनंधयस्य बालस्य आद्या प्रवृत्तिः इष्टसाधनताज्ञानाधीना, तच्च प्रथमं ज्ञानं संस्कारजन्यमिति कार्यबलेन कारणसत्त्वमनुमीयते तद्वदत्रापि अदृष्टादिकारणसहकारेण इदानीन्तनस्मरणरूपकार्यबलेन कारणस्यानुमानं सम्भवतीति वक्तुं शक्यम्। तथा श्रुत्या स्मृत्या चायमर्थः प्रदिदर्शयिषितः। श्रुत्या यथा ''सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्'' इति। स्मृत्या यथा ''न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा'' इति च।

**संसारः जीवस्य वा ईश्वरस्य**

लोके जायमानः सर्वोऽपि व्यवहारः अज्ञानपूर्वक इत्यवश्यमभ्युपेयम्। अविद्वानेव अहमिदं ममेदं इदं कार्यम् इदं कारणमित्यादि व्यवहरति, न तु ज्ञानी। ज्ञानी यदा भवति तदा तस्य सर्वत्र आत्मैकत्वविज्ञानात् सर्वम् आत्मत्वेन पश्यतीति तस्य भयजनकं द्वितीयं वस्त्वेव न विद्यते। अत एवाह भगवती श्रुतिः **द्वितीयाद्वै भयं भवति**[5] तत्रैव च भााष्यकारैरभिहितम् **यस्माद्द्वितीयाद्वस्त्वन्तराद्वै भयं भवति; द्वितीयं च वस्त्वन्तरमविद्या-प्रत्युपस्थापितमेव। न ह्यदृश्यमानं द्वितीयं भयजन्मनो हेतुः, ''तत्र को मोहः कः शोक एकत्वमनुपश्यतः''**[6] इति मन्त्रवर्णात् इति च। तथा च यस्य अविद्या–वासनादिदोषाः तस्यैव संसार एवञ्च जीवस्यैव संसार इति फलितम्। ईश्वरस्य तु संसारकारणीभूतानामविद्यादीनामसत्त्वात् संसाराभावः। तथा च धर्माधर्मादिलक्षणः संसारः जीवस्यैव इत्यतः कर्मफलोपभोगसाधनानां शरीर–इन्द्रिय–अन्तःकरणादीनां सम्बन्धोऽपि जीवस्यैव नत्वीश्वरस्य।

अत्र यद्यपि जीवस्यापि परमात्मस्वरूपत्वात् जीवस्यास्ति संसारः नत्वीश्वरस्येत्यत्र नियामकं तावत् किञ्चिद्वक्तव्यम्। तत्रोच्यते। यद्यपि संसारी नेश्वरादन्यः तथापि यथा एकस्यैवाकाशस्य घटगुहादिरूपोपाधिभेदभिन्नस्य घटाकाश–गुहाकाशेत्यादिभेदबुद्धिपूर्वकाः व्यवहाराः लोके, तद्वदेव देह–अन्तःकरण–अविद्यादिसम्बन्धवशात् अविवेककृतः

जीवेश्वरयोः भेदप्रत्ययः न तु वस्तुतः तयोर्भेदः। अत एव श्रुतिस्तावत् स्पष्टं दर्शयति शरीरादिसम्बन्धाभावं दर्शयति **'न तस्य कार्यं करणं च विद्यते न तत्समश्चा-भ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधेव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।'**[7] तथा

> **अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।**
> **स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्॥**[8]

इत्यादिना। **तथा च जीव एव संसरति न तु परमात्मा इति सिद्धम्।** अत एव **पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ**[9] इति सूत्रे ईश्वरस्य ये सर्वज्ञत्वादिगुणाः तद्विपरीत–अल्पज्ञत्वादिधर्माणां प्रत्यक्षतया जीवे उपलभ्यमानत्वात् जीवस्य न परमार्थतोऽपि ब्रह्मस्वरूपत्वमित्याक्षिप्य तत्रैवाग्रे जीवस्य यत् वास्तवं स्वरूपं तत् विद्यमानमपि अविद्यादिव्यवधानात् तिरोहितमित्युक्तम्। तथा च परमात्मैकनिष्ठस्य जनस्य निवृत्तान्धकारस्य ईश्वरप्रसादात् वास्तवं स्वरूपमाविर्भवति न स्वभावतः सर्वेषाम् इत्युक्तम्। तत्रैवान्ते –

> **ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः।**
> **तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः॥**[10]

इत्यादिश्रुतिं दर्शितार्थे उपोद्बलकत्वेन प्रदर्श्यं भाष्यकारैरभिहितम् **''ततो हि ईश्वराद्धेतोः, अस्य जीवस्य, बन्धमोक्षौ भवतः ईश्वरस्वरूपापरिज्ञानात् बन्धः, तत्स्वरूपपरिज्ञानात्तु मोक्षः।''**[11] इति।

### बन्धस्य निवर्तने विशेषः

लोके यथा यज्ञ–श्राद्धप्रजोत्पत्ति–ब्रह्मचर्य-स्वाध्यायाध्ययनाध्यापनादिना देव–पितृ–आचार्यऋणानि त्रीण्यपाकरोति मनुष्यः। एवञ्च कर्ता अन्यः फलमन्यस्येति विशेषः दृष्टः। तथा भाराधिक्येन क्लान्तः जनः अन्येन जनेन भारापगमे सम्पादिते यथा भारान्मुक्तः सुखी सम्पद्यते। परन्तु क्वचिच्च स्वानुष्ठितेन कर्मणैव फलं प्राप्यते नान्येनानुष्ठितेन कर्मणा। यथा रोगी स्वयं पथ्यपरिपालनपुरःसरमौषधं स्वीकरोति तदा तस्य रोगनिवृत्तिरूपं फलं दृष्टम्। यथा वा क्षुत्–पिपासापीडितः स्वयं यदा भुङ्क्ते तदैव तृप्तिरूपं फलं लभते, नत्वन्यनेनानुष्ठितेन कर्मणा। तथा बन्धविषयेऽपि समाना गतिः। तथा हि यस्य बन्धः तस्य निवृत्त्यर्थं तदर्थमावश्यकचित्तशुद्ध्यादिसम्पादने कर्मानुष्ठानं स्वेनैव कर्तव्यम्। तथा अज्ञाननिवृत्त्यर्थम् अपेक्षितं यत् ब्रह्मज्ञानं तस्य लाभार्थमपि श्रवण–मनन–निदिध्यासनादि-

रूपेषु साधनेषु स्वयमेव प्रवृत्तिं संपाद्य वास्तवं यदात्मस्वरूपं तज्ज्ञातव्यम्, अन्यकृतेन श्रवणादिना नान्यस्य तत्त्वज्ञानं न वान्येनानुष्ठितेन कर्मणा अन्यस्य चित्तशुद्धिरिति भावः स्पष्टतया विवेकचूडामणौ भगवत्पादैः प्रदर्शितः –

**वस्तुस्वरूपं स्फुटबोधचक्षुषा स्वेनैव वेद्यं न तु पण्डितेन।**
**चन्द्रस्वरूपं निजचक्षुषैव ज्ञातव्यमन्यैरवगम्यते किम्॥**[12]

अत एव रत्नप्रभायामप्युक्तं रामानन्दयतिभिः अध्यासभाष्यव्याख्यानावसरे **अन्यज्ञानादन्यत्र भ्रमानिवृत्तेः** इति।

**संसारस्य निवर्तकं किम्**

शोकमोहाख्यसंसारबीजभूतायाः आत्मज्ञानप्रतिबन्धिकायाः अविद्यायाः निवृत्तौ सत्यामेव हि अविद्यावान् ज्ञानी भवतीत्यतः सहेतुकसंसारनिवर्तकं ज्ञानं कीदृशमिति इदानीं चिन्त्यते। ब्रह्मज्ञानेन साक्षात् संसारः न निवर्त्यते, अपि तु संसारबीजभूतायाः अविद्यायाः निवर्तकत्वेन संसारनिवर्तकत्वम्। निवर्तकस्य निवर्त्यस्य च समानविषयकत्वं सामानाधिकरण्यम् आदौ प्रदर्शनीयम्। अन्यथा निवर्त्य–निवर्तकभावानुपपत्तेः। अतः यद्विषयकं ज्ञानं तत् तत्समान-विषयकमेवाज्ञानं निवर्तयति। अतः ब्रह्मज्ञानं ब्रह्मविषयकमज्ञानं नाशयतीति स्वीकार्यम्। संसारकाले च अविद्यादिवशात् ब्रह्मणः वास्तवं स्वरूपं जीवेन नावगम्यत इति जीवनिष्ठं ब्रह्मविषयकज्ञानं तदा भवति, जाते ब्रह्मसाक्षात्कारे अज्ञानं निवर्तते।

**अविद्याकामकर्मादिपाशबन्धं विमोचितुम्।**
**कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि॥**
**न योगेन न साङ्ख्येन कर्मणा नो न विद्यया।**
**ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा॥**[13]

अत एव तत्त्वज्ञानसाधनीभूतशास्त्रे प्रवृत्त्यर्थमावश्यकं यत् प्रयोजनाद्यनुबन्धप्रदर्शनं तत्र शास्त्रं प्रयोजनवत् बन्धनिवर्तकज्ञानहेतुत्वात्, रज्जुरियमित्यादिवाक्यवत्। बन्धो ज्ञाननिवर्त्यः अध्यस्तत्वात् रज्जुसर्पवत् इत्याद्यनुमानान्यपि प्रमाणीभवन्ति। अत एव काठकोप-निषद्भाष्यव्याख्याने आनन्दगिरीये **यश्च त्वया देहव्यतिरिक्त आत्मा दृष्टस्तस्यैव परमार्थस्वरूपज्ञानं संसारनिवर्तकं परमानन्दप्राप्तिसाधनं धर्म्यं च नातः परं श्रेयःसाधनमस्ती**[14] त्युक्तमप्यत्रानुसन्धेयम्। अन्येषां मते बन्धस्य सत्यत्वेन ज्ञानाद-निवृत्तेरुपायान्तरसाध्या मुक्तिः। सिद्धान्ते ज्ञानादेव मुक्तिरिति विवेकः।

*

**सन्दर्भाः–**


1. श्वेताश्वतरोपनिषत्, 6.11
2. भगवद्गीता, 9.29
3. ऋग्वेदसंहिता, 10.192.3
4. भगवद्गीता, 15.3
5. बृहदारण्यकोपनिषत्, 1.4.2
6. ईशावास्योपनिषत्, 7
7. श्वेताश्वतरोपनिषत्, 6.8
8. श्वेताश्वतरोपनिषत्, 3.19
9. ब्रह्मसूत्राणि, 1.3.2.5
10. श्वेताश्वतरोपनिषत्, 1.11
11. ब्रह्मसूत्रशाङ्करभाष्यम्, 1.3.2.5
12. विवेकचूडामणिः, श्लो.56
13. विवेकचूडामणिः, श्लो.57-58
14. काठकोपनिषत्, आनन्दगिरीये, 1.2.12.13


*

# विकरणविवेकः

**सुस्मिता साहा**

**सारसंक्षेपः**

तिङन्तपदनिर्माणाय विकरणास्तु सहायकाः। न खलु सर्वेषु तिङ्षु, कर्तरि सार्वधातुके परे हि विकरणाः प्रयुज्यन्ते। भावे कर्मणि तु सार्वधातुकेभ्यः यग्भवति। विकरणस्य अतिव्याप्त्यादिदोषरहितं लक्षणन्तु 'कर्त्रर्थत्वे सति सार्वधातुके परे धातुषु विशेषाधायकत्वं गणविभाजकत्वञ्च विकरणत्वम्।' इति कातन्त्रव्याकरणे पुनः विकरणस्य कारितसंज्ञा कृता। न हि भावकर्मकर्तारो विकरणार्थाः भवितुमर्हन्ति तथात्वे कृताभिहिते विकरणाभावः स्यात्। अतः विकरणस्य केवलं कर्त्रर्थ एव। सार्वधातुकस्य हि एते अर्था भवितुमर्हन्ति। ततः कर्तरि सार्वधातुके परे शप् भवति, कर्मणि भावे च यक्। विकरणास्तु सर्वदा आगमवद्भवन्ति यतस्तस्य आगमे कस्यापि अवयवस्य निवृत्तिः न भवति। पाणिनिव्याकरणे कर्तरि सार्वधातुके परे शब्विकरणो निर्दिष्टः। अयं शप् भ्वाद्यदादिचुरादिगणे भवति। न खलु तथापि एतेषामेकत्रैवान्तर्भुक्तिः समुचिता। अदादेः लुग्विकरणत्वात् चुरादेश्च णिच्प्रत्यययुक्तत्वात्। एवं जुहोत्यादिभ्यः श्लुः भवति। दिवादिभ्यः श्यन्, स्वादिभ्यः श्नुः, तुदादिभ्यः शः, तनादिकृञ्भ्यः उः, क्र्यादिभ्यः श्न–विकरणा भवन्ति। पाणिनिभिन्ने व्याकरणे तु विकरणानां भिन्नरूपं दृश्यते। पदसिद्धौ विकरणानामस्ति महत् प्रयोजनम्। विकरणाद्धातुषु गुणवृद्ध्यादिकार्यं दृश्यते। अपि विकरणानामुपस्थितेः हेतोः हि धातोरुत्तरं नलोपः, आयादेशः, लघूपधगुणादिकार्यं भवति। स्त्रीप्रत्ययविधानेऽपि दृश्यते विकरणस्य सूत्रलघ्वीकरणे तात्पर्यम्। विकरणस्य अवयवाः कदाचित् स्वरसाधनेऽपि उपकुर्वन्ति।

**भूमिका**

वाक्यं तु क्रियापेक्षम्। विना क्रियां वाक्यं न भवितुमर्हति। प्रायः दृश्यते सर्वस्य वाक्यस्य अभिप्रायः क्रियायामेव समाप्तो भवति। केषुचित् वाक्येषु क्रियापदं विनैव वाक्यस्य आकाङ्क्षायाः निवृत्तावपि तत्र तु क्रियापदे अध्याहृतेऽपि वाक्यार्थः पूर्णतां गच्छति।

यथा 'सुशीलः बालकः' इत्यस्मिन् विशेष्यविशेषणबोधके वाक्ये भवतीति क्रियापदमुह्यमेव। ततः हि क्रियापदस्य व्यवहारः संस्कृतव्याकरणे सर्वाधिकः। व्याकरणे एतानि क्रियापदानि हि धातुसंज्ञकाः। सर्वस्मिन्नेव व्याकरणे बहवः धातवः लक्ष्यन्ते। इमे धातवः दशधा भवन्ति। एकैकस्यां श्रेण्यां प्रथमस्य धातोः नाम्ना दशगणाः आचार्यैरुपदिष्टाः। ते हि–

**भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च।**
**तुदादिश्च रुधादिश्च तनक्र्यादिः चुरादयः॥** इति।

अधुना जिज्ञासा भवति धातुरूपेषु एवं पृथक् गणविभागः कथं भवति? वस्तुतः एतेषां गणानां धातुरूपेषु धातुप्रत्यययोः मध्ये कस्यचन नूतनस्य वर्णस्योत्पत्तिः दृश्यते। यथा भूधातोस्तिप्प्रत्ययेन 'भू ति' इति जाते पुनः भवतीत्येवं तयोर्मध्ये अवादेशो भवति। अत्र तु धातुप्रत्यययोः मध्ये शबागमे शपयोः लोपे च अकारस्य गुणकार्येण 'भवती'ति रूपं जायते। धातुप्रत्यययोः मध्ये स्थितोऽयं विकरण उच्यते। अधुना अहमस्मिन् विकरणविवेकः इति शोधपत्रे विकरणसम्बन्धिनीं नानाविधामालोचनां यथासाध्यं करिष्यामि।

**विकरणस्य स्वरूपम्**

विपूर्वकं कृधातोः ल्युटि विकरण इति शब्दः सिध्यति। विशेषेण क्रियते इति विकरणः। किं क्रियते? गुणबृद्ध्यादिरूपं कार्यं क्रियते। अनेन कार्येण धातुरूपाणि तेषां परिनिष्ठतं रूपं प्राप्नुवन्ति। विकरणस्य लक्षणं तु अष्टाध्याय्यां नोपलभ्यते। परन्तु तत्पूर्ववर्तिनि शाकटायनाचार्येण विरचिते शब्दानुशासने तद्विषये उक्तं – ''प्रकृतिप्रत्ययान्तः पतति यः सः विकरणः'' इति। कलापव्याकरणे तूक्तम् – ''विक्रियन्ते अवस्थान्तरं भजन्ते धातवोऽनेनेति विकरणः'' इति। वस्तुतः प्रकृतिप्रत्ययान्तस्तु यक्सन्यङादिप्रत्यया अपि पतन्ति। पुनश्च एतैरपि प्रत्ययैः धातवः अवस्थान्तरं भजन्ते। अतः विकरणस्य एवं स्वरूपे उक्ते अतिव्याप्तिः दोषो भवति।

एते विकरणास्तु कर्तरि सार्वधातुके परे सति धातोरुत्तरं भवन्ति। अतोऽस्य संज्ञायां वक्तुं शक्यते, कर्तरि सार्वधातुके तिङि परे धातोर्विहितानां प्रत्ययानां शबादीनां विकरणसंज्ञा भवति। अत्रापि विकरणस्य सम्पूर्णं स्वरूपं न प्रतिपद्यते। लक्षणन्तु वस्तुनः अव्याप्त्यति-व्याप्त्यसम्भवदूषणत्रयरहितः असाधारणधर्मः एव। लक्षणन्तु लक्ष्यमन्येभ्यो व्यावर्तयति। पूर्वपूर्वलक्षणे दोषानवलोक्य विकरणस्यैवं लक्षणं कर्तुं शक्यते, कर्त्रर्थत्वे सति सार्वधातुके परे धातुषु विशेषाधायकत्वं गणविभाजकत्वञ्च विकरणत्वम्'' इति। धातुषु सार्वधातुके परे तु यगादयोऽपि भवन्ति। परन्तु सार्वधातुके परे यक् तु कर्मणि भावे चैव भवति, न

तु कर्तरि। यथा, 'रामेण पठ्यते', 'विद्या स्वयमेव पठ्यते' इति। शबादयः विकरणास्तु कर्तर्येव भवन्ति। एवं लक्षणे सार्वधातुके इत्युक्ते लिङि लिटि इत्यादौ विहितानां तुगिड्यासुडादीनां प्रत्ययानां न विकरणसंज्ञा स्यात्, एतेषामार्धधातुके एव विहितत्वात्। विकरणाः धातुषु विशेषाधायकाः। अर्थात् विकरणानां प्रयोगेण धातुरूपेषु वैचित्र्याणि संलक्ष्यन्ते। यथा भ्वादिगणे 'भवति', 'गच्छती'त्यादयः भवन्ति। दिवादिषु तु श्यनि विकरणे यकारेऽवशिष्टे 'दीव्यति', 'सह्यती'त्यादीनि रूपाणि भवन्ति। एवमन्यत्रापि। एवं विकरणाः धातुषु गणविभाजकाः भवन्ति। एवं लक्षणे कृते सनादिभ्योऽपि नातिव्याप्तिः स्यात्। 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्रेण इषिकर्मणः इषिणैककर्तृकाद्धातोः सन्प्रत्ययो भवति इच्छायाम्। एवमेव पौनःपुन्यभृशाद्यर्थे द्योत्ये क्रियासमभिव्याहारे च धातोः यङ् भवति। न खल्वेते गणविभाजकाः। अपि चैतेषां सर्वेषां विशिष्टार्थनिर्दिष्टत्वात् विकरणेभ्यः एते भिद्यन्ते।

पाणिनिव्याकरणे एते सनादयः केवलं प्रत्ययाः एव। परन्तु कातन्त्रव्याकरणे तु एतेषां कारितसंज्ञा कृता। अपि च कारितस्यैव विकरणसंज्ञा तत्र स्वीकृता। कारितप्रदेशाः– ''कारितस्यानामिड्विकरणे'' इति।

**भावकर्मकर्तारः सार्वधातुकार्था विकरणार्था वेति विचारः**

तिङः भावकर्मकर्त्राद्यर्थाः भवन्ति। किमेते अर्थाः सार्वधातुकार्था विकरणार्था वा स्युः। अत्र तु वार्तिककारेण एवमुक्तं 'भावकर्मकर्तारः सार्वधातुकार्थाश्चेदेकद्विबहुषु नियमानुपपत्तिरतदर्थत्वात्' अर्थादेकस्मिन्नेकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन् बहुषु। एवमेव बहुष्वेव बहुवचनं नैकस्मिन् द्वयोरिति। यतः नियमोऽस्ति सार्वधातुकस्य, कर्त्राद्यर्थत्वे नियमस्यास्य अनुपपत्तिः स्यात्। परन्तु न केवलं सुपां तिङां च संख्यैव अर्थाः। अपि तु कर्मादयोऽप्यर्था इति भाष्यकारैः समाधानं कृतम्। अतः ज्ञायते भावकर्मकर्तारः सार्वधातुकार्था एव। ततः भावकर्मवाचिनि सार्वधातुके यक् भवति। कर्तृवाचिनि सार्वधातुके शप् भवति।

ननु एतेषां विकरणार्थत्वे किमापत्तिः स्यादित्यत्रोच्यते, भावकर्मकर्तारः विकरणार्थत्वे कृताभिहिते विकरणाभावः स्यात्। कृति विकरणः क्वचिदेव विधीयते। तेन कर्तरि कृदिति कृतः कर्त्रर्थः न सर्वत्रैव भवति। तेन धारयः पारय इत्यादौ विकरणाभावात् शपि गुणो न स्यात्। विकरणस्य यदि कर्त्राद्यर्थाः स्युस्तर्हि अदादौ लुग्विकरणे कः कर्त्रादीनभिधास्यति इत्यापत्तिः स्यात्। नापि पुनः भावकर्मणोः यदा लादेशः तदा कर्तरि विकरणाः, यदा कर्तरि लः तदा भावकर्मणोर्विकरणाः इति सम्भवन्ति। यतः प्रकृतिप्रत्ययौ प्रत्ययार्थं सह

ब्रुतः इति नियमादेकस्यैव कर्मकर्त्रादयः अर्थाः न सम्भवन्ति। यदा पचतीत्युच्यते तदा कर्ताभिधीयते। यथा रामः पचतीत्यत्र 'पच् ति' इति विग्रहे तिपः अर्थस्तु कर्ता। तत्तु कर्तारं रामम् आश्रीयते। पुनश्च रामेणोदनं पच्यते इत्यत्र कर्मवाच्ये तिपः न तु कर्तरि अन्वयः कर्मणि ओदने एव। अतः एकस्यैव लादेशस्य न खलु युगपत् कर्तृकर्मणोः अन्वयो भवति। यदा तु कर्तरि अन्वयः न तदा कर्मणि अन्वेतुं समर्थते। पुनः यदा कर्मणि अन्वीयते न तदा कर्तरि। अतः दृश्यते भावकर्मकर्तारः विकरणार्थाः न सम्भवन्ति, ते सार्वधातुकार्था एव।[1]

**विकरणाः आदेशवद्भवन्ति आगमवद्वा**

आपूर्वकं दिश्धातोः भावे घञि आदेशशब्दस्य व्युत्पत्तिः। आदेशस्तु येन विधीयमानेन अन्यत् प्रसक्तं निवर्तते।[2] यथा 'ससजुषो रुः' इति सूत्रेण सकारस्य स्थाने 'रुः' आदेशो भवति। रुकारादेशे प्राप्ते सकारस्य सम्पूर्णतया निवृत्तिः भवति। एवं 'स्तोः श्चुना श्चुः' इति सूत्रेण शकारस्य चवर्गस्य वा योगे सकारस्य स्थाने शकारः तवर्गस्य स्थाने चवर्गादेशो भवति। यथा गम् लट् ति = गच्छ् अति = गच्छति इति रूपम्।

आङुपसर्गपूर्वकात् गम्लृ गताविति धातोः अच्प्रत्ययेन आगमशब्दः सिध्यति। आगमस्य निर्वचनं कृतं यथा –

**अन्यत्र विद्यमानस्तु यो वर्णः श्रूयतेऽधिकः।**
**आगम्यमानतुल्यत्वात् स आगम इति स्मृतः॥** इति।

आगच्छति प्रकृतिप्रत्ययावनुपहत्य उत्पद्यते इति आगमः।[3] अतः व्युत्पत्त्या एव ज्ञायते आगमस्तु मित्रवद्भवति। विकरणा अपि प्रकृतिप्रत्ययावनुपहत्य धातुसार्वधातुकयोः मध्ये मित्रवत् हि प्रयुज्यन्ते। अतः विकरणास्तु आगमप्रत्ययाः एव।

**पाणिनिव्याकरणे तद्भिन्नेषु च विकरणस्य भेदाः**

पाणिनीव्याकरणे तथा सर्वस्मिन् व्याकरणे हि धातूनां दशधा गणाः लक्ष्यन्ते। प्रत्येकं गणस्य कृते एको विकरणः नाम अष्टप्रकारको विकरणो विभज्यते। ते यथा –

'कर्तरि शप्'[4] इत्यनेन सूत्रेण तु कर्तरि सार्वधातुके परे धातोः सामान्येन शप् विकरणो भवति। अतः भ्वादिगणे तु शप् भवति। भ्वादिगणीया धातवः यथा भू, गम्, वद्, पच् इत्यादयः।

अदादिगणीया धातवः यथा, 'अद्', 'तनु' 'क्षणु', 'हन्', 'दुह्', 'द्विष्' इत्यादयो धातवः। एतेभ्योऽदादिभ्योऽपि शप् भवति। भ्वादिष्वपि शप् भवति। किं तर्हि अदादीनां

भ्वादिषु अन्तर्भुक्तिः न भवति? वस्तुतः अदादिगणास्तु लुग्विकरणाः। अर्थात् अदादिषु शपः सम्पूर्णतया लोपो भवति। यथा 'अद् ति' इति स्थिते शपः लोपे च 'खरि च' इत्यनेन दकारस्य तकारादेशे 'अत्ति', 'अत्तः', 'अदन्ति' इति रूपं भवति।

'जुहोत्यादिभ्यः श्लुः'[5] इति सूत्रेण जुहोत्यादिधातोः शपः श्लुः भवति। अयं शपोऽपवादः। जुहोत्यादिगणीया धातवः यथा 'हु', 'भी', 'ह्री', 'पॄ', 'दान्' इत्यादयः। श्लौ कृते धातोः द्वे स्तः। तेन 'हु' धातोः शपः श्लौ 'हु अ हु ति' इति द्वित्वे अभ्यासकार्येण च 'जुहोति', 'जुहुतः' इत्यादयः। एवमेव 'बिभेति', 'जिह्रेति' 'पिपर्ति', 'ददाती'ति रूपाणि।

'दिवादिभ्यः श्यन्'[6] इत्यनेन दिवादिषु श्यन् विकरणो भवति। 'दिवु', 'षिवु', 'नृती', 'क्षिप्', 'जॄष्', 'शो', 'ज्ञा', 'जन्' इत्यादयः दिवादिगणीया धातवः। श्यनः शनकारावितौ। तेन दिव् य ति इति जाते 'हलि च' इत्यनेन दिव् इत्यस्य इकारस्य दीर्घे कृते श्यनः अपित्वेन ङित्वान्न गुण इति सिद्धं दीव्यति, दीव्यतः, दीव्यन्ति इति रूपम्। एवमेव नृत्यति, क्षिपति, सह्यति, जीर्यति इत्यादीनि रूपाणि भवन्ति।

'स्वादिभ्यः श्नुः'[7] इत्यनेन स्वादिषु श्नुविकरणो भवति। अयमपि शपोऽपवादः। सु, शक्, आप्, षध्, राधः इत्यादयः स्वादिगणीया धातवः। एतेभ्यः श्नुः भवति। श्नौ धातोर्न गुणो भवति। अस्य तु तिपमाश्रित्य गुणो भवति। सुनोतीति रूपम्। सुनुतः इत्यत्र तु तसः ङित्वादेवं रूपम्। एवमेव शक्नोति, आप्नोतीत्यादीनि रूपाणि भवन्ति।

'तुदादिभ्यः शः'[8] इत्यनुसारं तुदादिभ्यः शो भवति। तेन च तुदति, नुदति, सीदति, क्षिपति, कृषति, इत्यादीनि रूपाणि भवन्ति। अत्र शप्रत्ययस्य ङित्चान्न गुणो भवति।

'रुधादिभ्यः श्नम्' विकरणो भवति। अयमपि शपोऽपवादः। श्नमः शमाविति। मकारस्य इत्त्वादन्त्यादचः परो भवति। तेन रुनध् ति इति स्थिते झषस्तथोः इति धत्वे णत्वे रुणद्धि इति रूपम्।

'तनादिकृञ्भ्यः उः'[9] इत्यनेन कर्त्रर्थे सार्वधातुके परे तनादिभ्यः कृञ्भ्यश्च उप्रत्ययः स्यात्। उप्रत्ययस्यापि तिपमाश्रित्य गुणः तसादौ च ङित्वान्न गुणो भवति। तेन तनोति तनुतः तन्वन्ति इति रूपम्। एवमेव कृधातोः (डुकृञ् करणे) लुटस्तिपि उप्रत्ययमाश्रित्य ऋकारस्य गुणे रपरत्वे करोति कुरुतः कुर्वन्ति इति रूपाणि भवन्ति।

'क्र्यादिभ्यः श्ना'[10] इत्यनेन क्र्यादिगणीयानां धातूनां परं श्ना इति विकरणो

भवति। अयमपि शपोऽपवादः। श्नाधातोः शित्त्वात् 'ना' इत्येवमेव तिष्ठति। तेन च क्रीञ्धातोः क्री ना ति इति स्थिते श्नाप्रत्यये क्रीणाति इति रूपम्। एवमेव प्रीणाति इत्यादयः भवन्ति। चुरादिषु धातुषु स्वार्थे णिच् भवति। एतेभ्यस्तु शब्विकरणो भवति। पुनः चोरयति, पीडयति, बाधयति, पारयति इत्यादीनि रूपाणि भवन्ति।

एवं दृश्यते पाणिनिव्याकरणे विकरणविभागाः। पाणिनिभिन्नेषु व्याकरणसम्प्रदायेषु प्रायः विकरणविभागः समान एव। कुत्रचित् सामान्यतया भेदोऽपि दृश्यते। भोजदेवेन विरचिते सरस्वतीकण्ठाभरणे अङ्गीकृता विकरणाः पाणिनितुल्या एव। वोपदेवेन कृते मुग्धबोधव्याकरणे यद्यपि सर्वे विकरणाः न समानाः, परन्तु केचन। पुनश्च कातन्त्रव्याकरणे, शाकटायनस्य शब्दानुशासने विकरणस्य भिन्नरूपं दृश्यते।

कातन्त्रव्याकरणे तु भ्वादिषु अन्विकरणो[11] भवति। वस्तुतः भ्वादिषु हि अन्विकरणो भवतीति नात्र कुत्रापि नाम्ना उल्लिखितः। परन्तु चुरादिगणानां नामोल्लेखदर्शनात् शिष्टे भ्वादौ हि अन्विकरणो भवतीति बोध्यते। संक्षिप्तसारव्याकरणे पुनः शङ् विकरणो भवति। शाकटायनाचार्येण तु शब्दानुशासने भ्वादिषु अब्विकरणः स्वीकृतः। अदादिष्वपि मुग्धबोधव्याकरणे तथा शब्दानुशासने अप्प्रत्ययः एव स्वीकृतः। कातन्त्रे च 'जुहोत्यादीनां सार्वधातुके' इति सूत्रेण जुहोत्यादीनां सार्वधातुके परे द्विवचनं भवति। शाकटायनाचार्येण तु अत्रापि अब्विकरणः स्वीकृतः। तन्मतेऽपि गणेऽस्मिन् अपः लुकि धातोः द्वित्वं भवति। दिवादिभ्यस्तु मुग्धबोधव्याकरणे कातन्त्रे च यन्नेव स्वीकृतः। शाकटायनाचार्येण शब्दानुशासने श्यविकरणः स्वीकृतः। ततश्च 'य्वोर्विर्हसे' इत्यनेन दीर्घे कृते इकारस्य दीव्यति दीव्यतः दीव्यन्ति इति रूपं सिद्ध्यति। स्वादिषु तु मुग्धबोधे कातन्त्रे च नुविकरणो हि स्वीकृतः। तुदादिषु मुग्धबोधे कातन्त्ररूपमालायाञ्च अन् विकरणः स्वीकृतः। शब्दानुशासने तु 'तुद्भ्यः शः'[13] इति सूत्रेण शो भवति। तुदादिषु मुग्धबोधे णविकरणः कातन्त्रे च नो भवति। एवमस्तु दृश्यते पाणिनिभिन्ने व्याकरणे प्रायः पाणिनिभिन्ना विकरणा एव स्वीकृतः।

**विकरणस्योपयोगिता**

एते विकरणाः नानर्थकाः। एते धातोरुत्तरं स्थित्वा रूपसिद्धावुपकुर्वन्ति। विकरणाद्धातुषु कदाचिद् वृद्धिः भवति कदाचिद्वा गुणम्। पुनः विकरणाद्धातोः द्वित्वमपि भवति। धातुरूपेषु एते तु सदा आगमवदेव तिष्ठन्ति। परन्तु कदाचित् पुनः आदेशकार्यं जनयति। विकरणस्य लोपेऽपि कदाचित् लुग्विकरणाद्धि आदेशो भवति। एवं विकरणाः धातोरुत्तरं वृद्ध्यादिकार्येण धातोः परिनिष्ठितं रूपं साधयन्ति। तद्यथा-भूधातौ लटि परे तिप्तस्झिसिप्थस्थमिप्वस्मस्...

इति सूत्रेण तिबादिप्रत्यये विहिते ततश्च 'तिङ्शित्सार्वधातुकमि'ति सूत्रेण सार्वधातुकसंज्ञायाञ्च कर्तरि सार्वधातुके परे 'भू ति' इत्यवस्थायां 'कर्तरि शप्' इत्यनेन सूत्रेण शप्प्रत्ययो भवति। भू शप् ति इति स्थिते अनुबन्धलोपे गुणे अवादेशे 'भवति' इति रूपं सिद्ध्यति। अत्र गुणकार्ये विकरणः निमित्तभूतोऽस्ति।

'दंशसञ्जस्वञ्जां शपि'[14] 'रञ्जेश्च'[15] इत्याभ्यां सूत्राभ्यां दंश सञ्ज स्वञ्ज रञ्ज इत्येषामपि नलोपो भवति। तेन 'दशति', 'स्वजते' इत्यादीनि रूपाणि भवन्ति। एवमत्र नलोपद्वारा पदसिद्धौ विकरणस्योपकारिता।

'वेञ्' इत्यस्य शपि आयादेशो भवति।[16] तेन 'वयति', 'वयते' इत्यादिरूपं भवति। श्विधातावपि शपि गुणे आयादेशे च 'श्वयती'ति रूपं भवति। 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्ति-सर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः'[17] इत्यनेन शिति परे नाम शपि परे पिबाद्यादेशाः भवन्ति। तेन 'पिबति', 'जिघ्रति', 'धमति', 'तिष्ठति', 'यच्छती'ति रूपाणि भवन्ति।

शपि केषुचित् धातुषु लघूपधगुणः जायते। यथा, मुद्धातौ मोदते, गुद्धातौ गोदते इति रूपम्। एवं यृतृ जुतृ विभृ वेभृ इत्यादावपि शपि लघूपधगुणे 'योतते', 'जोतते', 'विविभे', 'विवेथे' इत्यादिरूपं भवति।

अदादिषु तु वेत्तेरित्यत्र लुग्विकरणाद् विद्धातोः लोटि परे आम्प्रत्ययो भवति। जागृ इति धातोस्तिपि शपः लुकि ऋकारस्य रपरत्वं भवति। तेन जागर्ति, जाग्रतः, जाग्रति इत्यादीनि रूपाणि भवन्ति। वस्तुतः अदादिगणे शब्विकरणस्य नाधिकं कार्यमस्ति। परन्तु शपं बाधित्वापि किञ्चित् कार्यं दृश्यते। तद्यथा, 'तनादिकृञ्भ्यो उः' इत्यनेन तनादेः कृञश्च उप्रत्ययः स्यात्। अयञ्च शपोऽपवादः। अनेन अपि एवास्य प्रवृत्तिरिति बोध्यते। तेन च 'न विश्वसेदविश्वस्तम्' इत्यत्र अदादिगणकार्यं शपो लुङ् न भवति। पुनश्च विदाङ्करोति लोटस्तिपि 'एरु'रित्यनेन उत्वे प्राप्ते शपं बाधित्वा उप्रत्यये ऋकारस्य गुणे विदाङ्करोत्विति रूपं भवति।

जुहोत्यादिषु श्लौ द्वित्वे हि जुहोत्यादीनि रूपाणि भवन्ति। ''भीह्रीभृहुवां श्लुवच्च''[19] इति सूत्रानुसारं 'भी–ह्री–मृ' इतिवद् हुधातावपि आमि श्लाविव द्वित्वे गुणो भवति। तेन जुहवाम जुहाव इत्यादीनि रूपाणि भवन्ति। एवमेव भीधातोरपि आमि द्वित्वे गुणे कृते 'विभयाम', 'विभाय' इत्यादीनि रूपाणि। एवं किधातोस्तिपि श्लौ द्वित्वे अभ्यासचुत्वे उत्तरखण्डस्य गुणेन 'चिकितः', 'चिक्यति' इत्यादीनि रूपाणि भवन्ति। 'धिष्' धापावपि श्लौ द्वित्वे लघूपधगुणे तकारस्य ष्टुत्वेन 'दिधेष्टि' इति रूपम्।

'ज्ञाजानोर्जा'[20] इति सूत्रानुसारं 'ज्ञा' तथा 'जन्' इत्यनयोः धात्वोः जादेशो भवति शिति परे। तेन जन्धातोः विकरणस्य श्यनः शित्त्वात् जादेशे प्राप्ते जायते इति रूपं भवति। ज्ञाधातोस्तु भ्वादिगणीयत्वाच्छपि कृते 'जानाति' इति रूपम्। तप् ऐश्वर्ये वा अनयोः श्यनि तङ् लभ्यते। तेन आत्मनेपदं भवति 'तप्यते' इति। अत्र मतानैक्यमस्ति, केषाञ्चन नये तप्धातोः शब्विकरणत्वात् परस्मैपदी तपतीति भवति। 'शमाष्टानां दीर्घः श्यनि'[21] इति सूत्रेण शमादीनामष्टानां धातूनां श्यनि पूर्वस्वरः दीर्घो भवति। ते धातवः यथा, शमस्तमुदमुस्थश्रमुभ्रमुरपि श्नमु क्लमुर्मदी चेत्येतेऽष्टौ शमादयः इति। तेन 'शाम्यति', 'ताम्यति', 'भ्राम्यति', 'श्राम्यति', 'क्षाम्यति' इत्यादीनि रूपाणि भवन्ति। शो धातोः ओतः ओकारस्य वा श्यनि परे सति लोपो भवति। तेन श्यति श्यतः श्यन्ति इति रूपं भवति। द्योधातोरपि शोधातुवद् ओतः लोपे द्यति द्यतः द्यन्ति इति रूपम्।

व्यध्धातौ श्यनो ङित्त्वाद् 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च'[22] इति सम्प्रसारणे पूर्वरूपे विध्यतीति रूपं भवति।

श्नमस्तु रुधादिगणे धातुरूपसिद्धौ काचन उपयोगिता दृश्यते। ञि इन्धी दीप्तौ त्रय आत्मनेपदिनः 'श्नान्नलोपः'[23] इति सूत्रेण श्नमः परस्य नकारस्य लोपो भवति। यथा इन्धी इत्यत्र श्नमि कृते इन् न ध् ते इति 'श्नसोरल्लोपः'24 इत्यल्लोपे इन् न ते इति स्थिते झषस्तथोः इति तकारस्य धत्वे पूर्वस्य धस्य जश्त्वे इन्द्धे इति रूपं भवति। अनेनैव सूत्रेण भनक्तीति रूपं भवति।

तृह्धातौ श्नमि कृते इमागमो भवति, हलादौ पिति परे सति। तेन तृणेढि इति रूपम्। हिंसि श्नमि इदित्त्वान्नुमि च कृते श्नान्नलोपः इति नुमो लोपो भवति। तेन हिनस्ति इति रूपम्। अञ्जुधातौ श्नमि कृते परसवर्णस्यासिद्धत्वात् 'श्नान्नलोपः' इति नकारलोपे जस्य कुत्वेन गः, तस्य चर्त्वेन ककारे कृते अनक्ति इति रूपम्। अङ्क्त इत्यत्र श्नमो नस्य परसवर्णे ङकारे रूपमिदं सिद्धम्। अञ्जन्तीत्यत्र तु श्नमो नस्य परसवर्णे ञो भवति।

## स्त्रीप्रत्ययविधाने विकरणस्योपयोगिता

'शप्श्यनोर्नित्यम्' इति सूत्रेण शतृप्रत्यये परे शप्श्यन्विकरणयुक्तधातुषु स्त्रीलिङ्गे नकारागमो भवति। शप्प्रत्यया भ्वादिषु तथा श्यन्प्रत्ययाः दिवादिषु भवन्ति। यथा 'दिव्यन्ती', 'गच्छन्ती', 'भवन्ती', 'हसन्ती' इत्यादयः। एकेनैव शब्विकरणेन भ्वादिषु ये धातवः सन्ति तेषां समेषां शतृप्रत्ययान्तं रूपं ज्ञापितम्। एवमेव दिवादिष्वपि। कलापव्याकरणेऽपि

दृश्यते ‘अप्ययोरान्नित्यम्’ इति सूत्रेण भ्वादिषु तथा दिवादिषु विहितयोः अप्प्रत्यययोः सम्बन्धिनः अकारात्परस्य शतृप्रत्ययस्य स्त्रीलिङ्गे नित्यं नुमागमो भवति।

## स्वरसाधने विकरणस्य प्रयोजनम्

पाणिनिव्याकरणस्य गतिः न खलु  लौकिके एव सीमिता अपि तु वैदिकेऽपि। अत्र वैदिकस्वराणामपि निर्णयः कृतः। वस्तुतस्तु विकरणेषु अनुबन्धानां व्यवहारः स्वरसाधनेऽपि उपकरोति। तद्यथा शबिति प्रत्यये पकारस्य इत्त्वे पित्त्वात् ‘‘अनुदात्तौ सुप्पितौ’’ इति सूत्रेण अनुदात्तसंज्ञा भवति शब्विकरणानाम्। शब्विकरणास्तु भ्वाद्यदादिगणेषु स्वीकृताः। अतः एतेषां धातूनामनुदात्तस्वरो भवति। पुनश्च ‘ञ्नित्यादिर्नित्यम्’ इति सूत्रेण नित्वे प्रत्यये परे सति प्रकृत आदिस्वर उदात्तो भवति। दिवादिभ्यः श्यन् विकरणो भवति। श्यनः शनावितौ भवतः। अतः नित्त्वात् ‘ञ्नित्यादिर्नित्यम्’ इति सूत्रेण दिवादिगणीयानां धातूनाम् आद्यक्षर उदात्तो भवति।

अतः दृश्यते पाणिनिना कृतेषु सूत्रेषु प्रत्ययेषु वा एकोऽपि वर्णः नानर्थकः। प्रत्ययानाम् अनुबन्धलोपेऽपि तस्य कार्यमस्ति। ततः हि भाष्यकारेणोक्तम् – **नैकेन वर्णेनाप्यनर्थकेन भवितव्यम्** इति। शब्दानुशासनेऽपि शाकटाचार्येण चतुर्षु गणेषु यथा भ्वादिषु, अदादिषु, जुहोत्यादिषु, दिवादिषु च अब्विकरणः स्वीकृतः। अत्रापि पकारस्य इत् भवति। नात्र स्वरविधानाय पित्त्वं कृतम्। तुदादिभ्यः भ्वादेः प्रत्ययभेदज्ञापनाय एव। अप्प्रत्ययेऽप्यकारोऽव शिष्यते। तथा तुद्भ्यः यः इत्यत्रापि अकारोऽवशिष्यते। उभयोरनयोः मध्ये भेदज्ञापनार्थमेव पकारः कृतः।

## उपसंहारः

अथ पाणिनिव्याकरणे विकरणानां प्रयोगः न निष्फलम्। न केवलं धातुरूपनिष्पत्तौ अपि च स्वरनिर्णये सूत्राणां लघूकरणेऽपि विकरणानां प्रयोजनमस्ति। एते विकरणाः गणविभागकरा भवन्ति। धातुपाठे तु दशसंख्यकाः गणाः सन्ति, परन्तु विकरणाः अष्टसंख्यकाः। यदि विकरणाः गणविभागकराः स्युस्तर्हि दशगणकृते दक्षाः विकरणाः एव भवितुमर्हन्ति। कथं तर्हि अष्टसंख्यकाः? यदि भ्वाद्यदादिचुरादिषु शबिति एक एव विकरणः स्यात्तर्हि एतेषामेतस्मिन्नेव विकरणे अन्तर्भुक्तिः करणीया। अस्त्यत्र प्रयोजनं पृथग्गणस्य। अदादिगणे विकरणस्तु लुग्विकरणः। तत्र विकरणस्य सम्पूर्णतया लुग्भवति। तेन अनि इति रूपं भवति न तु अदतीति। पुनश्च चुरादिगणेऽपि णिच्प्रत्ययो भवति तेन चोरयति इति रूपं भवति न तु चुरति इति। अतः भ्वादिषु प्रत्येकस्मिन् विकरणस्य

पृथगर्थत्वात् समविकरणे प्राप्तेऽपि एकस्मिन्नेव विकरणे हि अन्तर्भवेत्। पाणिनेः मुनेः सर्वाणि सूत्राणि तु सूक्ष्माणि दोषरहितानि च। तत्र एकमेव सूत्रं न व्यर्थम्। पाणिनिभिन्न-व्याकरणेषु विकरणेषु शानुबन्धाः प्रायः अनुपस्थिताः। पाणिनिना प्रयुक्तः शकारः नानर्थकः। अत्र प्रयोजनं तु सविशदं पूर्वमुक्तम्। श्नम्विकरणे तु मकारानुबन्धस्य प्रयोजने एवं वक्तुं शक्यते यत् वस्तुतः पाणिनिव्याकरणे 'मिदचोऽन्त्यात्परः' इत्येकेन सूत्रेणैव यत्र हि अचां मध्ये योऽन्त्यस्तस्मात् परस्तस्यैवान्तावयवो मित् स्यादिति ज्ञायते। अतः श्नम्विकरणे स्वीकृते यथा रुधादिभ्यः विकरणज्ञापनं भवति तथा मित्त्वात् नविकरणस्य स्थानमपि निर्दिश्यते इति पुनरपि ज्ञाप्यते पाणिनिसूत्रस्य स्वल्पाक्षरत्वम्। एवं पाणिनिव्याकरणे समेषां पदानामक्षराणाञ्चावश्यमेव सार्थक्यमस्ति।

*

**सन्दर्भाः—**


1. सार्वधातुके यक् 13.1.67, महाभाष्यम्
2. स्थानिवदादेशोऽनल्विधौ इति सूत्रस्य बालमनोरमाटीका
3. इति वाचस्पत्यम्
4. अष्टाध्यायी, 3.1.68
5. अष्टाध्यायी, 2.4.75
6. अष्टाध्यायी, 3.1.69
7. अष्टाध्यायी, 3.1.73
8. अष्टाध्यायी, 3.1.77
9. अष्टाध्यायी, 3.1.79
10. अष्टाध्यायी, 3.1.81
11. अन् विकरणः कर्तरि
12. दिवसुतुद्रुध्क्रादेर्यन्न्वण्नाः शिह्घे रे (द्वितीय पादः, मुग्धबोधव्याकरणम्।
13. शब्दानुशासनम् 4.3.32
14. अष्टाध्यायी, 6.4.69
15. अष्टाध्यायी, 6.4.26
16. भ्वादिप्रकरणम्, वैयाकरणसि.कौ.,पृ.249
17. अष्टाध्यायी, 7.3.78
18. अष्टाध्यायी, 7.3.77
19. अष्टाध्यायी, 3.1.39
20. अष्टाध्यायी, 7.3.79
21. अष्टाध्यायी, 7.3.74
22. अष्टाध्यायी, 6.1.16
23. अष्टाध्यायी, 6.4.23
24. अष्टाध्यायी, 6.4.111


*

# घेरण्डसंहिताग्रन्थे दैहिकशुद्धिप्रक्रियाविमर्शः

**स्वप्न मालः**

विश्वेऽस्मिन् प्राचीनकालादेव योगविद्यायाः महत्त्वं प्रतिपादितमस्ति। आर्यजातीनामितिहासेष्वपि योगतत्त्वानां वर्णनं प्राप्यते। मनुष्यजीवनेऽपि च चतुर्विधेषु पुरुषार्थेषु तथा धर्मार्थकाममोक्षेषु योगतत्त्वानां गुरुत्वं परिलक्ष्यते। योगानां विभागो द्विविधः स्वीकृतः लौकिकालौकिकप्रयोगत्वात्। अलौकिकयोगविषये कथितमस्ति – **अयं तु परमो धर्मो यद् योगेनात्मदर्शनम्।**[1] अत्र योगेनात्मदर्शनं परमो धर्म इति कथ्यते। वेदेषु पुराणेष्वितिहासेषु च योगशास्त्रस्य श्रेष्ठत्वं प्रतिपादितमस्ति। योगेन ऋषयो वैदिकमन्त्राननुभूतवन्तः। सूक्ष्मतत्त्वतः समुद्भूतमिदं जगत् योगेन सौन्दर्यमण्डितं भवति। अस्मात् कारणात् सकलतत्त्वानामुपरि योगशास्त्रस्य महत्त्वं विराजते। ऋग्वेदे[2] शिवसंहितायां[3] श्वेताश्वतरोपनिषदि[4] श्रीमद्भगवद्गीतायां[5] योगवसिष्ठरामायणेऽपि[6] योगस्य निदर्शनं प्राप्यते। योगमाहात्म्यनिरूपणप्रसङ्गे घेरण्डसंहितायां कथितमस्ति –

**नास्ति मायासमं पापं नास्ति योगात्परं बलम्।**
**नास्ति ज्ञानात्परो बन्धुर्नाहङ्कारात् परो रिपुः॥**[7]

कठ–श्वेताश्वतराद्युपनिषत्सु योगतत्त्वानां चर्चा विस्तृतरूपेण कृताऽस्ति। सर्वजनप्रसिद्धमस्ति यत् योगस्य विभाजनं चतुर्विधम्। तद्यथा – राज–लय–हठ–मन्त्रयोगाः। दत्तात्रेयसंहितायां कथितमस्ति –

**मन्त्रयोगो लयश्चैव हठयोगस्तथैव च।**
**राजयोगश्चतुर्थः स्याद् योगानामुत्तमस्तु सः॥**[8]

राजयोगश्चापि चतुर्विधः। यथा – आरम्भो घटः परिचयः निष्पत्तिश्च। योगशास्त्रे कथ्यते –

**आरम्भश्च घटश्चैव तथा परिचयः स्मृतः।**
**निष्पत्तिश्चेत्यवस्था च चतुर्थी परिकल्पिता॥**[9]

Tookaram Tatya महोदयेनोक्तम् The system of Yoga have different denominations according to their methods, and known as Aṣṭāṅga, Laya, Dhyāna, Mantra, Bhakti, Tāraka, Karma etc. All these, however, can be classed into two broad divisions : Haṭha - yoga and Rāja-yoga. These are interdependent, either of them being impracticable without the other.[10] महर्षिः पतञ्जलिः राजयोगस्य जनकरूपेण परिचितोऽस्ति। पतञ्जलिमतानुसारेण योगस्य द्विविधं लक्षणमस्ति – (1) तटस्थलक्षणम्, (ख) स्वरूपलक्षणञ्च। पतञ्जलिमतानुसारं योगस्य तटस्थलक्षणविधायकं सूत्रं भवति – योगश्चित्तवृत्तिनिरोधः।[11] स्वरूपलक्षणविधायकं सूत्रं भवति – तदा द्रष्टुः स्वरूपेऽवस्थानम्।[12] राजयोगस्य रूपान्तरं भवति भक्तिमार्गः। योगसूत्रकारेण कथितमस्ति– ईश्वरप्रणिधानाद्वा।[13] शाक्त–शैव–वैष्णवादिसम्प्रदायाः पातञ्जतयोग-सूत्रादीश्वरप्रणिधानमिति विषयं गृहीतवन्तः। तद्धेतौ योगसूत्रस्य प्रसिद्धभाष्यकारः व्यासदेवः कथितवान् – प्रणिधानाद् भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति अभिध्यानमात्रेण, तदभिध्यानादपि योगिन आसन्नतमः समाधिलाभः फलञ्च भवतीति।[14] योगचतुष्टये हठयोगः योगिनां समीपे उत्कृष्टयोग-मार्गरूपेणाभिहितोऽस्ति। हकारस्य ठकारस्य योगेन च हठयोगे भवति। ईडापिङ्गलानाड्योः प्रवाहितः स्यात् हकारः। एवञ्च सूर्यचन्द्रयोर्नामानुसारेण ठवर्णो गृहीतोऽस्ति। यदा ईडानाड्यां पिङ्गलानाड्यां च मनः प्रवाहितं भवति तदा मनः बहिर्गतिसम्पन्नं भवति। हठयोगेन नाडीद्वयस्यैक्यं भवति। इदमैक्यं भवति हठयोगस्य मूललक्ष्यम्। श्रीयुतब्रह्मानन्दविरचित-ज्योत्स्नाटीकायामुच्यतेहश्च ठश्च हठौ सूर्यचन्द्रौ तयोर्योगो हठयोगः। एतेन हठशब्दवाच्ययोः सूर्यचन्द्राख्ययोः प्राणापानयोरैक्यलक्षणः प्राणायामो हठयोगः इति हठयोगस्य लक्षणं सिद्धम्। तथा चोक्तं गोरक्षनाथेन सिद्धसिद्धान्तपद्धतौ –

**हकारः कीर्तितः सूर्यष्ठकारश्चन्द्र उच्यते।**
**सूर्याचन्द्रमसोर्योगाद्धठयोगो निगद्यते॥** इति।

तत्प्रतिपादिका विद्या हठयोगविद्या हठयोगशास्त्रमिति यावत्।[15]

हठयोगशास्त्रस्यानेकाः ग्रन्था विद्यन्ते। तन्मध्ये शिवसंहिता, हठयोगप्रदीपिका, गोरक्षपद्धतिः, दत्तात्रेयप्रोक्तयोगरहस्यम्, षट्–चक्रनिरूपणम्, अष्टावक्रसंहिता, ब्रह्मसंहिता, घेरण्डसंहिता, पराशरप्रोक्तयोगोपदेशादयः प्रमुखाः।

हठयोगसम्मतग्रन्थेषु घरेण्डसंहिता भवत्युत्कृष्टः ग्रन्थः। अत्रोल्लिखितं षट्–कर्मणो विवरणम्, आसनम्, मुद्रा, प्राणायामादीनां सूक्ष्मभेदनिरूपणं कुत्रापीतरेषु ग्रन्थेषु नोपलभ्यते।

घेरण्डसंहिता तन्त्रसाधनायां प्रकृष्टग्रन्थरूपेण स्थानं लभते। तन्त्रमतेन कथं समाधिलाभो भवतीति? शास्त्रे कथ्यते यत् तन्त्रयोगे भवति योगानां समन्वयः। अत्र घेरण्डसंहितायां षष्ठोपदेशे सूक्ष्मस्थूलगुरुध्यानस्य यदालोचनमस्ति तत्तु तन्त्रसम्मतम्। पातञ्जलयोगदर्शने लययोगस्य कुण्डलिनीयोगस्य च वर्णनं नास्ति। परन्तु घेरण्डसंहितायां तद्विशदवर्णनं प्राप्यते। पातञ्जलदर्शने – **जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः**[16] इति सूत्रे मन्त्रतः सिद्धिः स्वीकृताऽस्ति। भाष्यकारव्यासदेवोऽप्यनेकेषु स्थानेषु मन्त्रसिद्धिप्रसङ्ग-मुल्लिखितवान्। **तस्य वाचकः प्रणवः**[17] **तज्जपस्तदर्थभावनम्**[18] अस्मिन् सूत्रद्वयेऽपि मन्त्रतः सिद्धेर्विषयः सूत्रकारेणाङ्गीकृतोऽस्ति। घेरण्डसंहितायामाज्ञाचक्रे प्रणवमन्त्रस्य तथा ध्यानमजपाजपतत्त्वविषयकस्य मन्त्रस्योल्लेखोऽस्ति। टीकास्वपि गुरुध्यानविषये द्वादशात्मकाक्षरविशिष्टगुरुमन्त्रो गृहीतोऽस्ति। प्राणायामसाधनामुख्यभूतत्वादयं ग्रन्थो हठयोगान्तर्गतो भवति। परन्त्वन्तिमे हठयोगः राजयोगे पर्यवसितो भवति। पातञ्जलराजयोगः द्वैतमतसम्मतः, घेरण्डसंहितोक्तहठयोगः अद्वैतमतसम्मतो भवति। जीवो ब्रह्मैव नापरः, सोऽहम् इति प्रसिद्धवाक्यात् जीवब्रह्मैक्यं साधितं स्यात्। जीवब्रह्मैक्यावच्छिन्नमद्वैतमतं तन्त्रदर्शने, गोरक्षनाथरचिते योगबीजे मन्वर्थमञ्जरीग्रन्थे काश्मीरीयशैवदर्शनेऽप्यङ्गीकृतमस्ति।

घेरण्डसंहितायामुपदेशसप्तकेन योगतत्त्वानां वर्णनमस्ति। प्रथमोपदेशे कापालिकेन षट् कर्मविषयकोपदेशः प्रदत्तोऽस्ति। द्वितीयोपदेशे आसनं तत्प्रकारञ्च वर्णितोऽस्ति। तृतीयोपदेशे मुद्रास्वरूपमुपयोगश्च, चतुर्थोपदेशे प्रत्याहारः, पञ्चमोपदेशे स्थानं कालः मिताहारः नाडीशुद्धिः प्राणायामविधिः, षष्ठोपदेशे ध्याननियमः तत्प्रकारश्च सप्तमोपदेशे समाधियोगो वर्णितोऽस्ति।

हठयोगः राजयोगस्य सोपानस्वरूपो भवति। हठयोगस्य प्रवक्ता देवादिदेवमहादेवः। तं महादेवं प्रणम्य घेरण्डसंहिता प्रारभ्यते। तत्रोच्यते –

**आदीश्वराय प्रणमामि तस्मै येनोपदिष्टा हठयोगविद्या।**
**विराजते प्रोन्नतराजयोगमारोढुमिच्छन् विधियोग एव॥**[19]

आसीत् प्राक् श्रीचण्डकापालिकाभिधेयः कश्चिद्योगेच्छुः। सः चण्डकापालिको योगिश्रेष्ठस्य घेरण्डस्याश्रमस्य समीपं गत्वा विनयभक्तिभ्यां घेरण्डं प्रणम्य घटस्थयोगतत्त्व-विषये तथा घटयोगतत्त्वविषये पृष्टवान्।

**एकदा चण्डकापालिर्गत्वा घेरण्डकुट्टिमम्।**
**प्रणम्य विनयाद् भक्त्या घेरण्डं परिपृच्छति॥**

**घटस्थयोगं योगेश तत्त्वज्ञानस्य कारणम्।**
**इदानीं श्रोतुमिच्छामि योगेश्वर वद प्रभो॥**[20]

दत्तात्रेयसंहितानुसारं पूर्वोक्तं यत् प्रथमस्यारम्भयोगस्यानन्तरं राजयोगस्य चतुर्भागेषु द्वितीयं विभाजनं भवति घटयोगः। तत्र घटयोगस्वरूपस्य व्याख्यानमस्ति यथा –

**एवमभ्यासयोगेन सिद्धिरारम्भसम्भवा।**
**ततो भवेद् घटावस्था पवनाभ्यासिनः सदा॥**
**प्राणापानौ मनोवायू जीवात्मपरमात्मनौ।**
**अन्योन्यस्याविरोधेन एकता घटतो यदा॥**
**तदा घटाद्वयावस्था प्रसिद्धा योगिनां स्मृता॥**[21]

सकलतत्त्वज्ञानस्य कारणं भवति घटस्थयोगः। घटस्थितो योगः घटस्थयोगः घटयोगो वा कथ्यते। घटशब्देन देहः शरीरं वोच्यते। योगशास्त्रे प्रतिफलितमस्ति यत् –

**प्राणापाननादबिन्दुजीवात्मपरमात्मनः ।**
**मिलित्वा घटते यस्मात्तस्माद्वै घट उच्यते॥**[22]

हठयोगे देहस्य प्राधान्यं वर्तते। यस्मात् विश्वचराचरे स्थितं सर्वमेव अस्मिन् जीवदेहे दृश्यते तस्मात् घटतत्त्वं तथा देहतत्त्वं सर्वाग्रे ज्ञातव्यम्। शिवसंहितायां द्वितीये पटले देहस्थिततत्त्वानां वर्णनं प्राप्यते –

**देहेऽस्मिन् वर्तते मेरुः सप्तद्वीपसमन्वितः।**
**सरितः सागराः क्षेत्राणि क्षेत्रपालकाः॥**
**ऋषयो मुनयः सर्वे नक्षत्राणि ग्रहास्तथा।**
**पुण्यतीर्थानि पीठानि वर्तन्ते पीठदेवताः॥**
**सृष्टिसंहारकर्तारौ भ्रमन्तौ शशिभास्करौ।**
**नभो वायुश्च वह्निश्च जलं पृथ्वी तथैव च॥**
**त्रैलोक्ये यानि भूतानि तानि सर्वाणि देहतः।**
**मेरुं संवेष्ट्य सर्वत्र व्यवहारः प्रवर्तते॥**
**जानाति यः सर्वमिदं स योगी नात्र संशयः॥**[23]

यथा ककारादीनां वर्णानां दीर्घाभ्यासेन सकलशास्त्रस्य ज्ञानमुत्पद्यते तथा सुष्ठुयोगाभ्यासेन तत्त्वज्ञानं जायते। अत्रोच्यते –

**अभ्यासात् कादिवर्णानि यथा शास्त्राणि बोधयेत्।**
**तथा योगं समासाद्य तत्त्वज्ञानञ्च लभ्यते॥**[24]

पाप–पुण्यभोगार्थमिदं भौतिकं शरीरं तथा देहो जायते। कथ्यते यत् भोगायतनं शरीरम्। श्रीमद्भगवद्गीतायां प्रतिफलितमस्ति –

**इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।**
**एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥**[25]

तत्त्वकौमुदीटीकायां श्रीमता वाचस्पतिमिश्रेणोक्तम् – एतदेव शरीरं भोगायतनं पुरुषस्य...।[26] सत्कर्मणा सत्फलं तथा पुण्यमसत्कर्मणाऽसत्फलं तथा पापमुत्पद्यते। यद्वद् घटिकायन्त्रं यथोर्ध्वदेशादधोदेशं गच्छति तद्वद् जीवाः स्वस्वकर्मवशात् पुनः पुनः जन्म–नाश–पाप–पुण्यानि प्रत्यनुगता भूत्वा कर्मणां फलानि भुञ्जन्ति। जीवदेहो भवति मृत्तिकाविनिर्मितकुम्भसदृशः, जीवनं जलतुल्यम्, योगोऽनलसादृशः। मृत्तिकानिर्मिते घटे यदि जलं निक्षिप्तं स्यात्तदा घटो जलेन द्रवीभूतं भूत्वा क्षयप्राप्तं भवति। परन्तु यद्ययं घटोऽनलसंयोगेन दग्धं भवति तर्हि जलं स्थितिशीलं स्यात्। तद्रूपं योगव्यतिरिक्तं जीवशरीरं सर्वदा जीर्णं भवति किन्तु योगशिक्षया योगाभ्यासेन योगानलेन वा देहो विशुद्धः स्यात्। अतो हठयोगसम्मतघटयोगाभ्यासः सर्वदा करणीयः इति योगशास्त्रे झंकृतमस्ति –

**आसकुम्भ इवाम्भःस्थो जीर्य्यमाणः सदा घटः।**
**योगानलेन संदह्य घटशुद्धिं समाचरेत्॥**[27]

घटरूपदेहशुद्ध्यर्थं सर्वप्रथमं सप्तविधं साधनमवलम्बनीयम्। सप्तविधं साधनं यथा– शोधनं दार्ढ्यं स्थैर्य्यं ध्यैर्य्यं लाघवं प्रत्यक्षं निर्लिप्तञ्चेति। उक्तञ्च घेरण्डसंहितायाम्–

**शोधनं दृढता चैव स्थैर्य्यं ध्यैर्य्यञ्च लाघवम्।**
**प्रत्यक्षञ्च विनिर्लिप्तं घटस्थं सप्तसाधनम्॥**[28]

षट्–कर्मणा शोधनम्, आसनेन दार्ढ्यम्, मुद्रया स्थैर्य्यम्, प्रत्याहारेण ध्यैर्य्यम्, प्राणायामेन लाघवम्, ध्यानेन स्वात्ममध्ये चिन्तनीयपदार्थदर्शनम्, समाधियोगेन निर्लिप्त-भावः तथौदासीन्यं जायते। अनेन हठयोगसम्मतघटयोगाभ्यासेन तत्त्वज्ञानस्योत्पत्तिपूर्वको मोक्षो जायते। योगशास्त्रे परिलक्ष्यते –

**षट्–कर्मणा शोधनञ्च आसनेन भवेद्दृढम्।**
**मुद्रया स्थिरता चैव प्रत्याहारेण धीरता॥**
**प्राणायामाल्लाघवञ्च ध्यानात् प्रत्यक्षमात्मनि।**
**समाधिना निर्लिप्तञ्च मुक्तिरेव न संशयः॥**[29]

आदियामले लिखितमस्ति यत् यमः, नियमः, आसनम्, प्राणायामः, संयमः, प्रत्याहारः, धारणा, समाधिश्चेत्यष्टाङ्गानि योगाभ्यासशीलानां योगिनां साधनीयानि। दत्तात्रेय-संहितायां कथितमस्ति –

**यमश्च नियमश्चैव आसनञ्च ततः परम्।**
**प्राणायामश्चतुर्थः स्यात् प्रत्याहारश्च पञ्चमः॥**
**षष्ठी तु धारणा प्रोक्ता ध्यानं सप्तममुच्यते।**
**समाधिरष्टमः प्रोक्तः सर्वपुण्यफलप्रदः॥**
**एवमष्टाङ्गयोगञ्च याज्ञवल्क्यादयो विदुः॥**[30]

ध्यानबिन्दूपनिषदि आसनं प्राणसंरोधः प्रत्याहारः धारणा ध्यानं समाधिश्चेति षट्–संख्यानि योगाङ्गानि स्वीकृतानि। तत्रोच्यते –

**आसनं प्राणसंरोधः प्रत्याहारश्च धारणा।**
**ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट्॥**[31]

शोधनं षड्विधं यथा – धौतिः वस्तिः नेतिः लौलिकी त्राटकं कपालभातिश्च। अनेन षड्विधशोधनकर्मणा घटस्य तथा देहस्य निर्मलता जायते, चैतन्यञ्चोत्पद्यते। धौतिश्चतु-र्विधा अन्तर्धौतिः दन्तधौतिः हृद्धौतिः मूलशोधनञ्च। अनेन चतुर्विधधौतिकर्मणा घटो भवति निर्मलः। ऋषिणा घेरण्डेनोक्तम् –

**धौतिर्वस्तिस्तथा नेतिर्लौलिकी त्राटकं तथा।**
**कपालभातिश्चैतानि षट् कर्माणि समाचरेत्॥**
**अन्तर्धौतिर्दन्तधौतिर्हृद्धौतिर्मूलशोधनम् ।**
**धौतिं चतुर्विधां कृत्वा घटं कुर्वन्तु निर्मलम्॥**[32]

वातसार–वारिसार–वह्निसार–बहिष्कृताख्येभ्यः अन्तर्धौतिभागेभ्यः देहस्य विशुद्धिर्भवति। वातसारधौतिप्रक्रियामाध्यमेन शरीरशुद्धिर्भवति। वातसारस्यास्य प्रक्रिया फलञ्च कथ्यते घेरण्डमुनिना –

**काकचञ्चुवदास्येन पिबेद्वायुं शनैः शनैः।**
**चालयेदुदरं पश्चाद्वर्त्मना रेचयेच्छनैः॥**
**वातसारं परं गोप्यं देहनिर्मलकारणम्।**
**सर्वरोगक्षयकरं देहानलविवर्धकम्॥**[33]

काकचञ्चुवत् स्वस्यौष्ठयुगलं कृत्वा शनैः शनैः वारंवारं मुखेन वायुपानपूर्वकं तज्जठराभ्यन्तरे प्रेरयित्वा पुनः पुनः मुखेन तद्रेचनप्रक्रिया भवति वातसार–अन्तर्धौतिः। अनया पद्धत्या देहस्य निर्मलत्वं सर्वरोगविनाशः जठरानलपरिवर्धनं स्यात्। अत्यन्तं रहसि इयं वातसार–अन्तर्धौतिः करणीया।

इदानीं वारिसारं कथ्यते –

**आकण्ठं पुरयेद्वारि वक्त्रेण च पिबेच्छनैः।**
**चालयेदुदरेणैव चोदराद्रेचयेदधः॥**
**वारिसारं परं गोप्यं देहनिर्मलकारणम्।**
**साधयेत् तत् प्रयत्नेन देवदेहं प्रपद्यते॥**
**वारिसारं परां धौतिं साधयेद् यः प्रयत्नतः।**
**मलदेहं शोधयित्वा देवदेहं प्रपद्यते॥**[35]

मुखेन आकण्ठजलं प्रपूरयित्वा शनैः शनैः तज्जलं पातव्यम्। किञ्चित्कालानन्तर-मुदराभ्यन्तरे प्रेरयित्वाऽधोदेशेन रेचनेन वारिसार–अन्तर्धौतिप्रक्रिया जायते। अनया वारिसार-पद्धत्या शरीरस्य निर्मलत्वं जायते, मलदेहं विनश्य देवशरीरलाभो भवति। इयं धौतिप्रक्रिया गोप्या प्रयत्नपूर्वकं करणीया च। वारिसारमिव अग्निसार–अन्तर्धौतिविषये शास्त्रकारेण कथितं यत् निःश्वासरोधं कृत्वा मेरुपृष्ठे नाभिग्रन्थिं त्रिवारं संलग्नं कारयेत्। अनया धौतिप्रक्रिययाऽपि योगिनां योगसिद्धिः, जठराग्नेः परिवर्धनम्, उदरामयादिरोगाणां विनाशः, देवशरीरञ्चोत्पद्यते।

**नाभिग्रन्थिं मेरुपृष्ठे शतवारन्तु कारयेत्।**
**अग्निसारमेषा धौतिर्योगिनां योगसिद्धिदा॥**
**उदरामयजं त्यक्त्वा जठराग्निं विवर्धयेत्।**
**एषा धौतिः परा गोप्या देवानामपि दुर्लभा।**
**केवलं धौतिमात्रेण देवदेहं भवेद् ध्रुवम्॥**[35]

आदौ मुखं काकचञ्चुतुल्यं कृत्वा वायुपानपूर्वकमुदरपूरणेन तं वायुं प्रहरकालयावत् स्थापयित्वा अधोदेशं प्रति निक्षेपद्वारा बहिस्कृतधौतिर्भवति। ततः नाभिमग्नजले स्थित्वा शक्तिनाडीं बहिस्कृत्य हस्तेन मूलपर्यन्तं मलं प्रक्षालनं करणीयम्। पुनः पुनः एषा गोप्या धौतिप्रक्रियावलम्बेन देवसदृशशरीरं लभते। यावत् साधकोऽर्धयामकालावधिनिःश्वासनिरोध-पूर्वक धारणाशक्तिं कर्तुमसमर्थो भवति तावत् एतादृग्बहिष्कृतधौतिप्रक्रियावलम्बनं न करणीयम्।

तथोच्यते घेरण्डसंहितायां घेरण्डमुनिना –

**यामार्धं धारणाशक्तिं यावन्न साधयेन्नरः।**
**बहिस्कृतं महद्धौतिस्तावच्चैव न जायते।।**[36]

दन्तधौतिः पञ्चधा – दन्तमूलधौति – जिह्वामूलधौति–कर्णरन्ध्रद्वयधौति–कपाल रन्ध्रधौतयश्च। खादिररसेन शुद्धमृत्तिकया च सर्वमलनाशपर्यन्तं दन्तमूलमार्जनं करणीयम्। प्रत्यहं प्रातः दन्तरक्षानिमित्तमेतत् पालनीयम्। योगिनां समीपे इयं दन्तमूलधौतिः सर्वश्रेष्ठा सर्वप्रसिद्धा च। तस्मादुक्तं शास्त्रकारेण –

**दन्तमूलं परा धौतिर्योगिनां योगसाधने।**
**नित्यं कुर्यात् प्रभाते च दन्तरक्षणहेतवे।**
**दन्तमूलं धावनादिकार्येषु योगिनां मतम्।।**[37]

जिह्वामूलशोधनेन जिह्वायाः दीर्घत्वम्, जरा–मरणरोगादि विनष्टञ्च भवति।

प्रत्यहं प्रभाते सूर्यास्तकाले च तर्जनीमध्यमानामिकाङ्गुलित्रयेण गलमध्यदेशे प्रेरयित्वा जिह्वामूलपर्यन्तं पुनः पुनः मार्जनेन तथा च पुनः पुनः नवनीतेन मार्जयित्वा दोहयित्वा च लौहयन्त्रेण जिह्वाग्राकर्षणं कृत्वां जिह्वामूलधौतिः पालनीया। अनया प्रक्रियया शरीरे श्लेष्मादोषस्य विनाशो भवति जिह्वाया अपि दीर्घत्वं जायते।

प्रत्यहं तर्जन्यनामिकाभ्यां कर्णच्छिद्रयुगलपरिमार्जनेन कर्णधौतिप्रयोगेन वा नादान्तरं प्रकाशयेत्। प्रत्यहं निद्रान्ते भोजनावसाने दिनान्ते च दक्षिणहस्तस्य वृद्धाङ्गुष्ठेन कपालरन्ध्रकमार्जनेन कपालरन्ध्रधौतिर्भवति। अस्याः पद्धत्याः निरन्तराभ्यासेन कफदोषः विदूरितो भवति, नाड्यां निर्मलत्वं जायते, दिव्यदृष्टिरुत्पद्यते। दण्डधौति–वमनधौति–वासोधौतयश्च हृद्धौतिविभागः। रम्भादण्डं हरिद्रादण्डं वेत्रदण्डं वा हृन्मध्ये वारंवारं चालयित्वा शनैः प्रत्याहरेत्। इयं दण्डधौतिप्रक्रिया। अनया मुखेन श्लेष्मा–पित्तक्लेदाश्च निर्गता भवन्ति। ततः हृद्रोगोऽपि विनश्यति। भोजनान्ते सुधीः आकण्ठपूरितं वारि पिबेत्। अनन्तरमूर्ध्वदृष्टिं कृत्वा तज्जलं पुनः वमनेन वमनधौतिः स्यात्। अनया धौति-प्रक्रिययाऽपि नित्याभ्यासात् श्लेष्मा–पित्तादिदोषाणां ध्वंसो भवति। चतुरङ्गुलविस्तृतं सूक्ष्मवस्त्रं शनैः गलाधःकरणपूर्वकं तद्वस्त्रं पुनः बहिर्गतकरणेन वस्त्रधौतिप्रक्रिया करणीया। अस्याः नित्याभ्यासात् गुल्मादिरोगाणां नाशः, तथा च शरीरं बलशाल्यपि भवति। तथोक्तं योगशास्त्रे–

**चतुरङ्गुलविस्तारं हस्तपञ्चदशेन तु।**
**गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत्।**

**ततः प्रत्याहरेच्चैतत् क्षालनं धौतिकर्म तत्।**
**श्वासः कासः प्लीहा कुष्ठं कफरोगाश्च विंशतिः।**
**धौतिकर्मप्रसादेन शुध्यन्ते च न संशयः॥**[38]

हरिद्रामूलस्य दण्डेन मध्यमाङ्गुलिना वा जलसहयोगेन पुनः पुनः गुह्यदेशस्य क्षालनं करणीयम्। यावत् गुह्यांशः प्रक्षालितं न भवति तावदपानक्रूरता तिष्ठति। तस्मात् मूलशोधनं प्रयत्नपूर्वकं नित्यं करणीयम्। अनेन मूलशोधनमाध्यमेन कोष्ठकाठिन्याजीर्णं निवारणं भवति, देहस्योदरानलस्य कान्तिपुष्ट्योश्च वर्धनं भवति।

वस्तिप्रकरणन्तु द्विविधम् - जलवस्तिप्रकरणम्, शुष्कवस्तिप्रकरणम्। नाभिमग्नजले स्थित्वा उत्कलासनमाश्रित्य गुह्यदेशस्याकुञ्चनप्रसारणमाध्यमेन जलवस्तिप्रकरणं स्यात्। अनेन धौतिप्रक्रियामाध्यमेन यद्भवति तत्कथितं महर्षिणा घेरण्डेन –

**प्रमेहञ्च उदावर्तं क्रूरवायुं निवारयेत्।**
**भवेत् स्वच्छन्ददेहश्च कामदेवसमो भवेत्॥**[39]

स्थले च शुष्कवस्तिप्रकरणम्। अर्धहस्तप्रमाणसूत्रं नासानाले प्रवेशानन्तरं मुखाद् बहिर्देशनिर्गमनेन नेतियोगो भवति। नेतिकर्मसाधनेन खेचरीसिद्धिर्भवति, श्लेष्मादोषो विनष्टो भवति, दिव्यदृष्टिलाभो भवति। लौलिकयोगोऽपि घटयोगे गुरुत्वपूर्णः स्यात्। वेगेनोदरमुभयपार्श्वे भ्रमणेन यद्योगो भवति तल्लौलिकयोगः स्यात्। घेरण्डसंहितायां घेरण्डमुनिना कथ्यते –

**अमन्दवेगे तुन्दञ्च भ्रामयेदुभपार्श्वयोः।**
**सर्वरोगान्निहन्तीह देहानलविवर्धनम्॥**[40]

अनेन लौकिकयोगेन देहस्थितानलस्य वर्धनं भवति, रोगानाञ्च विनाशो भवति। दिव्यदेहः सञ्जायते। यावन्नेत्रद्वयं साश्रुपातं न भवति तावत् निर्निमेषलोचनाभ्यां कस्यचित् सूक्ष्मद्रव्यं प्रति दृष्टिपातेन त्राटकप्रयोगो भवति। अनेन त्राटकयोगाभ्यासेन शाम्भवीमुद्रासिद्धिः नेत्ररोगनाशः दिव्यदृष्टिलाभश्च प्रजायते।

**वातक्रमेण व्युत्क्रमेण शीत्क्रमेण विशेषतः।**
**भालभातिं त्रिधा कुर्यात् कफदोषं निवारयेत्॥**[41]

कपालभातिस्त्रिधा – वातक्रमकपालभातिः, व्युत्क्रमकपालभातिः, शीत्क्रमकपालभातिश्च। अनेन त्रिविधसाधनेन श्लेष्मादोषो दूरीभूतः स्यात्। शनैः शनैः इडां (वामनासिकां) वायुना पूरयित्वा पिङ्गलया (दक्षिणनासिकया) रेचनं पुनः पिङ्गलया वायुं पूरयित्वा इडया

बहिर्गमनभावात् वातक्रमकपालभातिर्भवति। अनेन योगाभ्यासेन कफदोषस्य निवारणं भवति। तथा च नासिकाभ्यां जलाकर्षणं कृत्वा पुनः तन्मुखेन बहिस्करणीयं तदनन्तरं मुखेन जलमाकृष्य तन्नासिकाभ्यां रेचनमाध्यमेन व्युत्क्रमकपालभातिः स्यात्। अनेन योगेनापि कफदोषस्य विनाशो भवति। शीत्कारपूर्वकं मुखेन जलं गृहीत्वा नासाभ्यां निर्गमनकारणात् शीत्क्रमकपालभातिः स्यात्। अनया योगपद्धत्या मदनतुल्यशरीरलाभो जरा–वार्धक्य–कफदोषाश्च दूरीभूताः स्युः। यथोक्तमृषिणा –

**शीत्कृत्य पीत्वा वक्त्रेण नासानालैर्विरेचयेत्।**
**एवमभ्यासयोगेन कामदेवसमो भवेत्॥**
**न जायते वार्धक्यञ्च जरा नैव प्रजायते।**
**भवेत् स्वच्छन्ददेहश्च कफदोषं निवारयेत्॥**[42]

एवं प्रकारेण मानवः योगी वा आसन–मुद्रा–प्रत्याहार–प्राणायामांश्चावलम्ब्य समाधिलाभं कुरुते। अत्र योगी समाधिलाभकाले सर्वत्रैव परमपदं विष्णोः पश्यतीत्युक्तं तथा च हठयोगस्य प्रवक्ताऽस्ति महेश्वरः। अर्थात् तेन वचनेन प्रमाणं भवति देवयोः विष्णुमहेश्वरयोर्मध्येऽभेदसम्बन्धो विद्यते। विष्णुश्च शिवश्च तदेकमेव तत्त्वम्। Tookaram Taya महोदयेनोक्तम् – The founders of the Hathayoga and Rājayogas are respetively the Gods Śiva and Viṣṇu. To demonstrate to the world the fundamental unity of those two systems which have only an apparently defferent outward guard, the founder worshipped each as his Guru unceasingly with the objects of securing eamancipation as expressd in the following maxim शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः।[43]

इत्थं हठयोगस्य प्रयोजनमस्ति राजयोगे उत्तरणार्थम्। यद्यपि राजयोगेन योगिनः समाधिलाभो भवति तथापि हठयोगेनापि समाधिर्भवति। परन्तु समाधिलाभात् प्राक् देहेन्द्रियाणां तथा च घटतत्त्वानां संयतकरणमस्ति। घटस्य तथा देहस्य मनसश्च शुद्धीकरणमपि योगिनां प्रयोजनम्। तद्धेतौ घेरण्डसंहितायां हठयोगसम्मतघटस्थयोगस्य विस्तृतमालोचनं कृतं भगवता घेरण्डेन। घटयोगावलम्बनपूर्वकं समाधिलाभेन योगिनां मुक्तिर्भवति। न केवलं तात्त्विकं व्याख्यानं कृतमत्र तेन साकं वर्तमानकाले समग्रे विश्वे करोनाप्रकोपावस्थायां हठयोगसम्मतघटयोगतत्त्वस्य व्यवहारिकप्रयोगोऽपि करणीयः। भगवता शिवेन प्रोक्तहठयोग-सम्मतघटयोगतत्त्वावलम्बनेन दैहिक–मानसिकशुद्धिभ्याञ्च साधारणमनुष्या अपि नीरोगा भविष्यन्तीति तन्मे मनः शिवसंकल्पमस्त्विति शम्। *

**सन्दर्भाः—**


1. याज्ञवल्क्यस्मृतिः, 1.8
2. ऋग्वेद, 1.5.3
3. शिवसंहिता, 1.17
4. श्वेताश्वतरोपनिषद्, 2.15
5. श्रीमद्भगवद्गीता, 4.4-5, 6.46
6. योगशास्त्रम्, पृ.15
7. योगशास्त्रम्, घेरण्डसंहिता, 1.4
8. दत्तात्रेयसंहिता, 18.19
9. तत्रैव, 20.21
10. हठयोगप्रदीपिकाया ब्रह्मानन्दविरचित-ज्योत्स्नाटीका, पृ.9
11. पातञ्जलयोगसूत्रम्, 1.2
12. तत्रैव, 1.3
13. तत्रैव, 1.23
14. योगसूत्रव्यासभाष्यम्, 1.23
15. हठयोगप्रदीपिकाया ब्रह्मानन्दविरचित-ज्योत्स्नाटीका, पृ.2
16. योगसूत्रम्, 4.1
17. योगसूत्रम्, 4.27
18. योगसूत्रम्, 4.28
19. घेरण्डसंहिता, मङ्गलाचरणश्लोकः
20. घेरण्डसंहिता, 1.1-2
21. दत्तात्रेयसंहिता, 178-180
22. शिवसंहिता, 3.67
23. तत्रैव, 2.1-5
24. घेरण्डसंहिता, 1.5
25. श्रीमद्भगवद्गीता, श्लो.13.2
26. सांख्यकारिका, 40
27. घेरण्डसंहिता, 1.8
28. घेरण्डसंहिता, 1.9
29. घेरण्डसंहिता, 1.10-11
30. दत्तात्रेयसंहिता, 52-56

31. ध्यानबिन्दूपनिषत्, 41
32. घेरण्डसंहिता, 1.12-13
33. घेरण्डसंहिता, 1.15-16
34. घेरण्डसंहिता, 1.17-19
35. घेरण्डसंहिता, 1.20-21
36. घेरण्डसंहिता, 1.25
37. घेरण्डसंहिता, 1.28
38. योगशास्त्र, पृ.317
39. घेरण्डसंहिता, 1.47
40. घेरण्डसंहिता, 1.52
41. घेरण्डसंहिता, 1.55
42. घेरण्डसंहिता, 1.59-60
43. हठयोगप्रदीपिकाया, पृ.16

*

# प्रणववादस्य अभिनवता

**सेविका-नाग**

सुप्राचीनः खलु प्रणववादः वेदान्तदर्शने। प्रत्यक्षरूपेण ऋग्वेदे ब्राह्मणग्रन्थेषु च 'ओङ्कार', 'प्रणव' वेति पदस्योल्लेखः नास्ति यतः ओङ्कारोऽयं प्रणवमन्त्रो वा गुह्यातिगुह्यः। वैदिकयुगे अस्योच्चारणं सार्वजनीनं नासीत्। ऐतरेयब्राह्मणे अ–उ–म प्रणव इति प्रकारान्तरेण तु दृश्यते – "तानि शुक्राण्यभवत्। तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायान्ताकार–उकार-मकार इति। तान् एकधा समभरत्। तदेतद् ओम् इति। तस्माद् ओम् इति प्रणौति।"[1] प्रकर्षेण नूयतेऽनेन इति प्रणवः एवमिति परिदृश्यते वाचस्पत्यमिति कोषशास्त्रे।[2] तत्र शब्दकल्पद्रुमेऽपि[3] प्रकर्षेण नूयते स्तूयते आत्मा स्वेष्टदेवता वानेनेति निगदितम्। प्र + णु स्तुतौ + ऋदोरप्[4] इति सूत्रेण इत्यत्र अप् विधीयते। 'उपसर्गादसमासेऽपि णोपदेशस्य'[5] इति णत्वम्। अयमोङ्कारः वाचकार्थे प्रतीकार्थे वा (Symbol), तर्कार्थे (Crossing), अक्षरार्थे (Eternal word) गृहीतः। संस्कृतभाषायां व्यावहारिकप्रयोगेऽपि क्वचिद् साध्वर्थे (Wellsaid) इत्यस्य ग्रहणं कृतम्। उपनिषत्प्रमाणे वेदान्तशास्त्रे क्वचित् शब्दब्रह्मणः समार्थकः अयमोङ्कारः। यदि ऐतिहासिकी दृष्टिरवलम्ब्यते, तर्हि प्रथमतः माण्डूक्योपनिषदि द्वादशे मन्त्रदले अस्योङ्कारस्योल्लेखो वर्तते।[6] माण्डूक्योपनिषदमवलम्ब्य गौडपादाचार्येण कृतायां माण्डूक्यकारिकायाम् आगमप्रकरणेऽपि[7] प्रणवप्रसङ्गोऽयं सविशदमुपवर्ण्यते। कठोपनिषदि अपि यम–नचिकेतः–संवादे[8] अस्य ओङ्कारस्य महिमा प्रकीर्तितः। तत्रैव यमेन शब्दब्रह्मणः परिचयः प्रदीयते। छान्दोग्योपनिषदुद्घोषयति यत् – "ओमित्येतदक्षरमुद्गीथमुपासीत"[9] इति। अत्र उद्गीथ ओङ्कार इत्यर्थः। यतो हि भूतानामेषां पृथिवी रसः, पृथिव्या आपो रसः, अपामोषधयो रसः, ओषधीनां पुरुषो, पुरुषस्य वाग्, वाच ऋग्, ऋचः साम, सामत उद्गीथो रसः। अन्यत्रापि[10] ओङ्कारस्य प्रणवस्य वा वर्णना उपलभ्यते। आस्तिकदर्शनेष्वपि प्रणवप्रसङ्गो व्याख्यातः। तत्र योगदर्शने समाधिपादे ईश्वरस्य वाचकः प्रणव इति कथितम्। प्राचीने दर्शने सांख्ये अक्षरशः 'प्रणव' इति पदं नास्ति। न्याय–वैशेषिके दर्शनेऽपि तदैव प्रतिभाति। पूर्वमीमांसाशास्त्रे

शब्दात्मकः ओङ्कारः प्रतिपादितः। इतिहासपुराणसाहित्येषु स्मृतिशास्त्रे च ओङ्कारमहिमा सुप्रसिद्धः। तत्र गीतायां श्रीभगवता गीतं – ''अहं ... प्रणवः सर्ववेदेषु''[11] इति।

भारतीयदर्शनशास्त्रपरम्परायां वेदान्तस्यावस्थानं सुप्राचीनम्। प्रस्थानत्रय्यां ये भाष्यकारास्ते आचार्य इति सामाजिकैः स्वीक्रियन्ते। यथा शङ्कर–रामानुज–मध्व–वल्लभ–निम्बार्कादीनां धाराः वेदान्तशास्त्रस्य अन्तर्गता इति। अतीव आमोदकारणं यत् ता धाराः अद्यावधि प्रवहन्ति। यथा प्राचीनाः सन्ति तथैव नवीना धारा अपि आविर्भूय वेदान्तशास्त्रम् अद्यापि संवर्धयन्ति। आधुनिकतमायां विंशशताब्द्यां श्रीओङ्कारनाथदेवेन अभिनवदर्शनमेकं प्रचारितम्। विद्वत्समाजे एतत् प्रणववादरूपेण ख्यातम्।

येषु ग्रन्थेषु तस्य प्रणवतत्त्वमिदं प्रतिष्ठितं ते सन्ति – 1. ब्रह्मसूत्रस्य ओङ्कारभाष्यम्, 2. गीतायाः प्रणवप्रेमपीयूषभाष्यम्, 3. श्रीचण्ड्याः प्रणवप्रेमामृतभाष्यम्, 4. उपनिषदां सद्गुरुकृपामृतभाष्यम्, 5. ब्रह्मानुसन्धानम्, 6. ओङ्कारसहस्रगीतिः, 7. पुरुषोत्तमः। अपि च प्रणवतत्त्वमिदं तस्य सार्धशताधिकग्रन्थे इतस्ततः विक्षिप्तरूपेण विधृतम्। एतेषां मध्ये श्रीश्रीनादलीलामृतम्, सुधाधारा, पुरुषोत्तमलीला, मातृगाथा, योगरहस्यम्, प्रपन्नपथिकम् (ज्ञानपथ), सनत्सुजातीयमध्यात्मशास्त्रं, श्रीश्रीनामामृतलहरी, क्षेपार–झुलि, महारसायनमित्यादौ ग्रन्थेषु तस्य प्रणववादस्याभिनवत्वं सुस्पष्टम्।

**सन्देहप्रयोजने**

गवेषणापद्धतिप्रसङ्गे प्राचीनाचार्याः अस्माकं मार्गं प्रदर्शयन्ति यत् –

1. विषयः, 2. संशयः, 3. पूर्वपक्षः,

4. उत्तरपक्षः सिद्धान्तपक्षो वा 5. प्रयोजनम् (= फलम्)[12]

केचित् तदतिरिक्तां सङ्गतिं[13] स्वीकुर्वन्ति।

अस्य प्रणववादस्याभिनवत्वसमीक्षणप्रसङ्गे मूलतः उल्लिखित–पद्धति–अवलम्बनेन ब्रह्मसूत्रोपरि श्रीओङ्कारनाथदेवप्रणीतस्य ओङ्कारभाष्यमाधृत्य वयमेतद्गवेषणासन्दर्भनिर्माणे प्रयासिनो भवामः। एतत्प्रणववादप्रतिष्ठापनार्थं तस्यापराणां दार्शनिकग्रन्थानां तत्त्वं वर्तमाननिबन्धे प्रयोजनानुसारेण उल्लिखितम्। किञ्च, विरुद्धा प्रतिपत्तिरूपा विप्रतिपत्तिरपि संशयस्य कारणं भवति। तथा च न्यायसूत्रम् – 'समानानेक–धर्मोपपत्ते–र्विप्रतिपत्तेरुपलब्ध्य–नुपलब्धव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः'[14] इति। अस्ति चात्र संशयबीजं विप्रतिपत्तिः। यदि प्रणववादो विषयः स्यात्तर्हि संशयो जायते –

1. प्रणववादः किं शङ्कराचार्यसम्मत – अद्वैतवादानुसारी रामानुजाचार्यस्य वा

विशिष्टाद्वैतवादेन प्रभावितः? किमिदं दर्शनं स्वतन्त्रं शङ्कर–रामानुजयोर्दर्शनयोः समन्वयो वा?

2. प्रणववादे सीतारामदास – ओङ्कारनाथदेवदर्शितस्य परतत्त्वस्य प्रणवस्य ओङ्कारस्य वा किं स्वरूपम्? किं वा तस्य प्रामाण्यम्? शास्त्रप्रोक्त – ओङ्काराद् अयमोङ्कारः स्वतन्त्रः न वेति?

3. पतञ्जलिकृत – योगसूत्रानुसारेण[15] वाचकः प्रणवः वाच्य ईश्वरश्च। पक्षान्तरेण, ओङ्कारनाथमते वाच्यवाचकौ उभावेव प्रणवः – कथम्?

4. ब्रह्मसूत्रस्य आरम्भणाधिकरणे 'पटवच्च'[16] इति सूत्रस्योङ्कारभाष्ये तेनोक्तम् – समकाले यदि ओङ्कारः परब्रह्म अपरब्रह्म च भवतः, तर्हि समकाले परब्रह्म अपरब्रह्म चोभे एव कारणं भवेत् – कथम् ?

5. महारसायनमिति ग्रन्थे श्रीओङ्कारनाथदेवेनोक्तम् – 'विश्वस्य आदि–स्पन्दनं प्रणवः'[17] इति। अस्मात् प्रणवात् सकला सृष्टिर्जायते। जगच्च रसतम–शब्दब्रह्म–ओङ्कारस्य घनीभूता मूर्तिरिति। अतः अभिनवप्रणववादसम्मता सृष्टिप्रक्रिया कीदृशी भवति? एतत्संशयसमाधानार्थं वयं पूर्वपक्ष – उत्तरपक्षक्रमेण अग्रं गच्छामः। गवेषणानिबन्धोऽयमतः क्वचित् वर्णनात्मकः, क्वचित् विश्लेषणात्मकः, क्वचिच्च तुलनात्मकः। यथा –

(क) श्रीओङ्कारनाथदेवः तस्य कतिपयविशिष्टशिष्येभ्यः रामानुजीयपरम्परायां सन्न्यासं प्राददिति प्रायोगिकी दिगेव तस्य। तात्त्विकदृष्ट्या तु तस्य दर्शनमद्वैतवादं समर्थयति। शङ्कराद्वैतदर्शनाद् ओङ्कारदर्शनस्य विविधेषु अभिनवतत्त्वेषु एकमिति यत् – शङ्कराद्वैतदर्शने 'ब्रह्मास्मि' इत्यनुभव एव चरमावस्था। अभिनवप्रणववादस्य तु चरमावस्था केवलं 'ब्रह्म ब्रह्म ब्रह्म' इति वा; 'अस्मि अस्मि अस्मि' इत्यनुभवो वा। यतः 'ब्रह्मास्मि' इत्यनुभवे द्वैतलेशः वर्तते।

(ख) ब्रह्मसूत्रस्य ओङ्कारभाष्यम् अस्माकं गवेषणासन्दर्भस्याधारः। अत एवास्य भाष्यस्य घाटनिक–वैशिष्ट्यमपि लक्षणीयम्। शाङ्करभाष्यतः श्रीभाष्यतश्च एतद्भाष्यस्य स्वातन्त्र्यमपि अस्माभिर्दृश्यते। यथा – ब्रह्मसूत्रस्योपरि श्रीओङ्कारनाथदेवप्रणीतस्य ओङ्कारभाष्यस्य आदावन्ते च 'श्रीमद्–भगवद्–रामानुजाचार्य–कृत–वेदान्तसारोक्त–ब्रह्मसूत्र' मिति उल्लिखितमस्ति। स्वाभाविकतया एषा धारणा जायते यत्तर्हि रामानुजीयं क्रमं तद्व्याख्यां चावलम्ब्य ओङ्कारभाष्यमपि कृतम्। उल्लेखनीयं यत् तत्तु सर्वत्र न गृह्यते एतद्भाष्ये। एतन्मध्ये कतिपयानि सूत्राणि शङ्कराचार्यमतमवलम्बितानि। व्यतिक्रमं तु अस्य परिलक्ष्यते।

यथा – 'न च स्मार्तमतद्धर्माभिलापात्'[18], 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते'[19] सूत्रद्वयमेतत् शाङ्करपाठे। श्रीओङ्कारनाथदेवस्य ब्रह्मसूत्रक्रमे दृश्यते यत् – 'ॐ न च स्मार्तमतद्धर्माभिलाषपाच्छारीरश्च ॐ'[20], 'ॐ उभयेऽपि हि भेदेनैनमधीयते ॐ'[21] इति सूत्रद्वयम्।

(ग) देवताधिकरणे 'शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्'[22] इति सूत्रे शङ्कराचार्येण स्फोटवादः खण्डितः, मीमांसकानां वर्णनित्यतावादः समर्थितश्च। ओङ्कारनाथदर्शनं तु स्फोटवादमङ्गीकृत्य अपि चरममद्वैतमतं पन्थानञ्च पोषयति। अपि च साधनस्य प्राथमिकपर्याये कर्म भक्तिश्च स्वीकृतेऽपि एतद्दर्शनं न तु विशिष्टाद्वैतदर्शनमिति। अस्मादभिनवप्रणववादस्य भित्तिस्थापनाय शाङ्कर–रामानुज–दर्शनाभ्याम् अस्याभिनवत्व-विश्लेषणं प्रयोजनीयमिति।

(घ) अपि च 'अथातो ब्रह्मजिज्ञासा'[23] सूत्रस्योङ्कारभाष्ये 'अथ' शब्दस्यानन्तर्यार्थे गृहीतेऽपि तस्य तात्पर्यमप्यत्र चिन्तितम्। अत्र 'अनन्तर' – पदस्यार्थः सगुणमन्त्रेण इष्टदेवतायाः साक्षात् लाभादनन्तरम्।[24] एवं 'जन्माद्यस्य यतः'[25] इति सूत्रव्याख्यानप्रसङ्गे तेनोक्तम् – चराचरप्रपञ्चस्यास्य सृष्टिर्भवति ओङ्कारादेव। तन्मते इयं पृथिवी, आकाशः, स्वर्गः, नक्षत्रम्, वाक्यम्, ऋषिः, गौः, अजाश्वादयः सर्वे एव छन्दसः स्पन्दनाद्वा उत्पद्यन्ते। शब्दं विना हि स्पन्दनं न भवति। आदौ शब्दः, ततः स्पन्दनम्। अयमोङ्कार एव जगत् धारयति अस्मिन्नोङ्कारे चैव सर्वं प्रलीयते।[26]

अपि चायमोङ्कारः प्रणवो वा द्विविधः – 1. परप्रणवः, 2. अपरप्रणवश्चेति।[27] परप्रणवस्य चतुर्विधाः पादाः वर्तन्ते। ते यथा – 1. अविद्यापादः, 2. विद्यापादः, 3. आनन्दपादः, 4. तुरीयपादश्चेति।[28] यदा ब्रह्म अनुपहितं निष्क्रियं भवति तदा तस्य 'परब्रह्म' – संज्ञेति भवति। तद्रूपः प्रणवोऽपि तदा परप्रणव इत्यभिधीयते। अनुपहिते चैतन्ये तदा अपरप्रणवस्याङ्गसकलमेव लीयते। सुतरां तदा सः अवाङ्मनसगोचरं परब्रह्मस्वरूपञ्चेति, तदात्मकः परप्रणवः जीवन्मुक्तस्य योगयुक्तस्य स्वरूपावस्थापन्नस्य महापुरुषस्य वा अनुभाव्यः। यदा ब्रह्म प्रकृत्यामुपहितं वा प्रकृतिस्वरूपं वा सृजति, तदा प्रकृति–पुरुष–महत्तत्त्व–अहङ्कारतत्त्व–ब्रह्म–विष्णु–महेश्वरादिपर्यन्तं स्थूलजगत् सर्वमेव सगुण–ब्रह्म इति। एतदात्मकः प्रणवः तदा अपरप्रणवः शब्दब्रह्म वेति कथ्यते। उपनिषदि अपि समाम्नातः – 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।'[29]

(ङ) अस्मिन् प्रेक्षापटे जायते प्रश्नोऽयं यत् – श्रीओङ्कारनाथदेवस्य परप्रणवः अपरप्रणवश्च किं शङ्करसम्मतेन निर्गुणब्रह्मणा सह रामानुजस्य सगुणब्रह्मणा सह तुलनीयः

स्वतन्त्रः वेति। अत एव अभिनवप्रणववादेन सह शङ्कराचार्यस्याद्वैतवादस्य च रामानुजाचार्यस्य विशिष्टाद्वैतवादस्य च तुलनात्मकमध्ययनमत्र प्रासङ्गिकं सञ्जातम्। ओङ्कारभाष्यस्यारम्भे शाङ्करभाष्यवदध्यासभाष्यमनुपस्थितम्। रामानुजाचार्येणापि अध्यासः न स्वीकृतः। सप्तधानुपपत्तिप्रसङ्गे च मायावादः तेन खण्डितः। पक्षान्तरेण, श्रीओङ्कारनाथदेवः अध्यासभाष्यं न कृतवान्। अपि तु ब्रह्मसूत्रोपरि तस्य ओङ्कारभाष्ये अपरेषु च ग्रन्थेषु मुख्यतया अविद्या माया वा स्वीकृता। मते तस्य बहुदर्शनमेव अविद्येति। अपि च संसारप्रवर्तिका, पुरुषविमोहिनी परिस्पन्दनादिः शक्तिर्या सा मायेति।[३०] प्रसङ्गेऽस्मिन् ख्यातिवादः विचारणीयः। यतो हि ख्यातिशब्दस्याभिधानिकार्थः ज्ञानमिति; दार्शनिकपरिभाषायान्तु प्रचलितोऽर्थः भ्रमे भासमानस्य वस्तुनः ज्ञानमिति। अपि चायमध्यासः अतस्मिंस्तद्बुद्धिरिति। फलतः अयमपि पर्यायवाची भ्रमज्ञानस्य। आचार्यः शङ्करः अध्यासभाष्यस्यान्ते अध्यासस्याविद्यकत्वे अर्थापत्तिप्रमाणं लौकिकव्यवहारस्थले आविद्यकत्वे अनुमानञ्च प्रमाणं प्रदर्शितवान्। अतः अध्यासस्योपादनं यदि अविद्या स्यात्तर्हि अध्यासः अवश्यमेव तिष्ठतीति। अत एव अभिनवप्रणववादे माया वा अविद्या वा स्वीकृता। अतः अध्यास एव विचारणीयः।

द्वितीयतः, अभिनवप्रणववादः चरमाद्वैतवाद इति स्वीकृते किमपि द्वितीयतत्त्वं तत्र न स्थातुं शक्यते, जगतः मिथ्यात्वप्रसङ्गात्। अतः ओङ्कारनाथदर्शने जगत् कथं प्रतिभातमिदमपि विवेच्यम्।

ख्यातिवादप्रसङ्गक्रमेण जगदिदं यदि मिथ्या स्यात्, कार्यञ्च स्यादिति तर्हि जगदिदं कथं कार्यमित्यपि विश्लेषणीयम्। विवर्तवादी परिणामवादी वा सर्वे वेदान्ताः सत्कार्यवादिन इति। अतः कीदृशः सत्कार्यवादः ओङ्कारनाथदर्शने स्वीकृत इत्यपि मूलप्रबन्धस्यालोच्यविषयः। अस्मिन् प्रेक्षापटे आरम्भणाधिकरणस्य ओङ्कारभाष्ये उच्यते यत् – कारणं कार्यान्न भिन्नमिति कारणे कार्यस्य विद्यमानत्वात्।[३१] ततः जिज्ञासा वर्तते – जगद् यदि कार्यं स्यात्, तस्य कारणञ्च यदि ओङ्कारः प्रणवो वा स्यात्तर्हि अभिनवप्रणववाददृष्ट्या सृष्टिरपि आलोच्यविषयो भवेत्। विश्वस्यादिस्पन्दनं प्रणव इति महारसायनमिति ग्रन्थे तेनोक्तम्। कार्यकारणभेदेन प्रणवोऽयं द्विविधः।[३२] कारणे परशब्दत्वात् बृहत्वाच्च; कार्ये शब्दत्वात् बृहत्वाच्च कार्यकारणे उभे एव ओङ्कारब्रह्म।

एतदोङ्कारब्रह्म अकामयत, बहु भविष्ये, जनिष्ये इति। तदोङ्कारब्रह्म स्वयमात्मानमसृजत्।[३३] तदा सा एषणा हि तस्मिन् निस्तरङ्गे परमे शान्ते परमब्रह्मणि सच्चिदानन्दघने परमपदे नादरूपेण परिणताऽभवत्। तन्नाद एव प्रणवाकारेण छन्दोभिः

चिदाकाशे प्रसारितोऽभवत्। आदौ गायत्रीच्छन्दसा प्रणवोऽयं प्रकाशितः। ब्रह्मा च प्रथममेनमपश्यत्। अतोऽस्य प्रणवस्य ऋषिर्ब्रह्मा, गायत्रीच्छन्दः, अग्निर्देवता च। सर्वकर्मारम्भे एवास्य प्रयोजनम्। गायत्री–उष्णिकादि–सप्तच्छन्दोभिः प्रणवः प्रथमं प्रकाशितोऽभवत्। वेदे तन्नाद एव प्राणस्पन्दनमिति व्यपदिश्यते – प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम्।[34]

नामरूपात्मिकायाः सृष्टेरस्या यथार्थस्वरूपोपलब्ध्यर्थं बन्धनमुक्त्यर्थञ्च श्रीओङ्कारनाथ-देवेन नामनामवतोरभिन्नता प्रतिपादिता। तस्योपलब्धौ नाम कदापि उपायः, कदापि वा उपेय इति। यतो हि नामवतो भिन्ना नाम्नः सत्ता नाङ्गीक्रियते तेन। महर्षिणा पतञ्जलिनाऽभिहितं यत् प्रणवः केवलमीश्वरस्य वाचक इति।[35] अभिनवप्रणववादे तु वाचकः वाच्यान्न भिन्न इति। अत एव ओङ्कारनाथदर्शने स्फोटरूपिणि ओङ्कारे वाच्यवाचकरूपो बोध्यबोधकरूपः कश्चिद् द्वैतभावो भेदभावो वा नास्ति। परावाग्रूपादोङ्कारात् सकलवर्णमालायाः सृष्टिः, अतोऽङ्कारान्न भिन्नः वर्णः शब्दो वा। अपि च यत्र यत्र शब्दः तत्र तत्र स्पन्दनमवश्येव तिष्ठति। अतः शब्दस्पन्दनयोर्मध्ये नित्यसम्बन्धो विद्यते। शारदातिलकतन्त्रेऽपि सच्चिदानन्द-स्वरूपात् सप्रकृतिक–परमेश्वरादादौ शक्तिः, ततः नादः, अनन्तरं नादाद्बिन्दुः समुद्भवतीति।[36] अतः श्रीओङ्कारनाथदेवोन्मोचितं नादतत्त्वं प्रासङ्गिकमिति।

पुनरयं स्फोट एव सर्वस्य जगतः अभिव्यक्तेः कारणं शब्दब्रह्म[37] इति। नामसमुदायानां भावसमुदायानां वा अनन्तसमवायि–उपादान–स्वरूपमयम् अनन्तकोटिस्फोटः। अपि च स्फोट एव सा शक्तिः यथा भगवान् आदौ स्वयं स्फोटरूपेण परिणतोऽभवत्। अनन्तरं सः स्फोटः अपेक्षाकृत–स्थूल–परिदृश्यमान–जगद्रूपेण प्रकाशितोऽभवत्। शब्दाज् जगतः सृष्टिरिति वाक्यपदीयेऽपि[38] स्पष्टतयोक्तम्। शब्दोऽयं न तु केवलं भेदावधारणस्य कारणम्; अपि च विश्वसृष्टेरन्यतमकारणमिति तत्त्वं हरिवृषभवृत्तौ परिलक्ष्यते।[39]

अस्य स्फोटस्य केवलमेकः वाचकः शब्दः ॐ इति। न केनापि विश्लेषणेन भावादस्मात् वयं शब्दान् पृथक्कर्तुं शक्नुमः। ओङ्कारस्य व्यस्तरूपः 'अ' इति वर्णस्योच्चारणस्थानं कण्ठः, म–कारस्य चोच्चारणस्थानम् ओष्ठः।[40] अत एव कण्ठनिर्गतो ध्वनिर्यथा अविच्छिन्नरूपेण ओष्ठमागच्छति तथा त्रिमात्रिके सत्यपि ओङ्कारे तस्यैकाक्षररूपमेव लक्षणीयम्।[41] श्रीओङ्कारनाथदेवोऽवोचत् यत् निर्गुणोऽयं नादः। अत्र तु प्रश्नः जायते– यदि नादः श्रुतो भवति तर्हि तस्य निर्गुणत्वं कथं सम्भवति? समाधाने एतदुच्यते – यः शब्दः पुरुषेणोत्थितः सः सगुणशब्दः, योऽनाहतस्तु ध्वनिः स्वतः उत्थितो भवति,

यस्य निवारणसामर्थ्यं नास्ति कस्यापि, सः सगुण इति वक्तुं न शक्यते। अत एव यः नादः सः नादस्य श्रोताऽपि भवितुमर्हति। स एव नादरूपेण लीलां करोति। अपि च स एव कर्णस्य कर्णरूपेण शृणोतीति।[42] छान्दोग्यश्रुतावपि वर्णितं यन्नादः ब्रह्मज्योतिः-श्रवणचिह्नमिति – 'तस्यैषा श्रुतिः यत्रैतत् कर्णावपि गृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति'[43] इति।

**निष्कर्षः**

ब्रह्मसूत्रालोके परिलक्ष्यते – ''शास्त्रं ब्रह्म विचाराख्यमध्यायाः स्युश्चतुर्विधाः। समन्वयाविरोधौ द्वौ साधनं च फलं तथा।।''[44] अर्थाद् समन्वयाख्यः प्रथमोऽध्यायः ब्रह्मसूत्रस्य। अस्य श्रवणे ब्रह्मविषयक–प्रमाणगत–असम्भावना दूरीभवति। द्वितीयस्त्व-विरोधाध्यायः। मननेऽस्य प्रमेयगता असम्भावना निवारिता। तृतीयोऽध्यायः साधनाध्यायः। अस्य ध्यानेन विपरीतभावनानिचयो विदूरितो भवति। प्रबन्धेऽस्मिन् अस्माकं विचारः एतत्क्रमेण ग्रथितः। यथा प्रथमोऽध्यायः शङ्कररामानुजाभ्यामभिनवप्रणववादस्य तुलनात्मक-मध्ययनम्। अस्मिन्नध्याये केवलं समन्वयाध्यायमाश्रित्य बादराणकृतब्रह्मसूत्रमिति ग्रन्थस्योपरि यथाक्रमं शाङ्करभाष्य–श्रीभाष्य–ओङ्कारभाष्यस्य विचारः प्रदर्शितः। तत्र व्याख्यानावसरे भाष्यत्रयस्य तात्त्विकालोचना अपि तु शैलिकालोचना विवर्णिता। वैचित्र्यचित्रीकृतेऽपि अस्माकमनुभव एव प्रधानतया परिपुष्टो भवति, यतो हि एतद्दर्शने अनुभवप्राधान्यं दृश्यते। तदनुभवस्तु न केवलं कल्पनीयः, अपि तु अनुगमनार्हः, शास्त्रसमर्थितश्च। श्रीओङ्कारनाथ-देवस्य एतद्दर्शने अनुभवात्मकः जीवः जगच्च परप्रणवस्य मूर्तिरित्युद्घोषितम्। शङ्कररामानुजाभ्यां तस्य मतिः स्वच्छन्दतया अविरोधिगतिमनुसृत्य प्रवहमाना भवति। जीवस्य परमप्राप्तिरिति मोक्षः। शङ्करमते तत्त्वमसीत्यादिवाक्येन ऐक्यज्ञानसम्भविते 'अहं ब्रह्मास्मि' इत्यनुभवः जायते। किन्तु श्रीओङ्कारनाथदेवमते अस्यामवस्थायामपि द्वैतलेशो वर्तते। तत्र भवन्मते अस्मीत्यनुभवः अथवा ब्रह्मानुभवः अद्वैते प्रतिष्ठितो भवति। तन्मते ओङ्कारः प्रणवो वा सर्वमिति। जीवस्य जगतः च सर्वस्यैव मूलम् ओङ्कार इति। विविधानि शात्राण्यवलम्ब्य अस्य प्रणवस्य जगदात्मकः रूपः, जीवात्मकः रूपो वा प्रदर्शितः तस्य ग्रन्थनिचये। ओङ्कारस्य अ–उ–म–अर्धमात्रेति चतुर्विधतत्त्वं परा–पश्यन्ती–मध्यमा–वैखर्यामपि च जाग्रत्स्वप्नसुषुप्तितुरीयेषु पादेषु च सुप्रयुक्तम्। पूर्वापराचार्यैः यथाक्रमं श्रुत्या युक्त्यानुभवेन च तेषां वादाः स्थापिताः। श्रीओङ्कारनाथदेवस्य वैशिष्ट्यमेतद्वैचित्र्ये। तस्य प्रणववादः अनुभूति–श्रुति–युक्ति–इत्यनुक्रमेण वर्णितः। अतः तस्य स्वातन्त्र्यमस्माभिः परिलक्षितमिति। प्रणववादस्य परतत्त्वमोङ्कारः प्रणवः वा, अतः समन्वयाध्याये ओङ्कारे

एव समन्वयः अस्माभिर्दृश्यते। अनुभवेऽस्य समन्वयः मुख्यतया उल्लिखितः। अस्यानुभवप्रापणं नाम एव प्राथमिकी साधना। षष्ठेऽध्याये एषा नामनामवतोरभिन्नता विस्तृतरूपेणालोच्यते। प्रणववादस्य प्राचीनत्वे न कस्यापि आशङ्का, किन्तु श्रीओङ्कारनाथ-देवस्य प्रणववादः किञ्चिद्रूपेण भिन्नः तस्योपस्थापने। उपनिषदि या प्रणवोपासना दृश्यते सा तु न साधारणगम्या किन्तु श्रीओङ्कारनाथदेवस्य नामसंकीर्तनं प्रणामश्च साधनद्वयेन जीवस्य परममुख्यप्रयोजनं तु अधिकतरमुपयोगितामाप्नोति। अतः दर्शनमेतत् न केवलं तात्त्विकविचारे प्रयतितमपि तु साधारण्ये अस्य प्रायोगिकी सत्ताऽनुभूयते। तत्र अधिकारिसामर्थ्यमपि युगानुरोधेन लघुतरमिति दृश्यते।

शास्त्रोपनिषन्मन्थनेन अस्योङ्कारस्य स्थूल–सूक्ष्म–कारणरूपाणि समुग्ररूपेणावबोध्यते। यथा – षोडशमात्राविशिष्टस्य प्रणवस्य उपासना एव विदेहमुक्तिलाभस्योपाय इति श्रीओङ्कार नाथदेवः कथयति। तत्र नादबिन्दूपनिषदि द्वादशमात्राविशिष्टा प्रणवोपासना व्याख्याता। षोडशमात्रा तु नारदपरिव्राजकोपनिषदि दृश्यते। यथा – अथ हैनं भगवन्तं परमेष्ठिनं नारदः प्रपञ्चसंसारातारकं प्रणवं ब्रूहीति। तथेति परमेष्ठी वक्तुमुपचक्रमे ओमिति ब्रह्मेति व्यष्टि–समष्टिप्रकारेण। तत्र का व्यष्टिः का समष्टिः? संहारप्रणवः, सृष्टिप्रणवश्चान्त-र्बहिश्चोभयात्मकत्वात् त्रिविधो ब्रह्मप्रणवः। अन्तःप्रणवो व्यावहारिकप्रणवः। बाह्यप्रणवः आर्षप्रणवः। उभयात्मको विराट्प्रणवः। संहारप्रणवो ब्रह्मप्रणवः अर्धमात्राप्रणवः। अस्मिन् अर्धमात्रात्मके प्रणवे सर्वं लीयते। ओमिति ब्रह्म। ओमित्येकाक्षरमन्तःप्रणवं विद्धि। स चाष्टधा भिद्यते। अकारोकारमकारोऽर्धमात्रा–नाद–बिन्दु–कला–शक्तिश्चेति। तत्र चत्वारः अकारश्चायुतावयवान्वित उकारः सहस्रावयवान्वितो मकारः शतावयवोपेतोऽर्धमात्रा प्रणवोऽनन्तावयवाकारः। सगुणो विराट् प्रणवः संहारो निर्गुणप्रणव उभयात्मकोत्पत्तिप्रणवो यथा प्लुतो विराट् प्लुतः प्लुतसंहारो विराट् प्रणवः षोडशमात्रात्मकः षट्त्रिंशत्तत्वातीतः। षोडशमात्रात्मकत्वं कथम्? इत्युच्यते अकारः प्रथमोकारो द्वितीया, मकारस्तृतीयार्धमात्रा चतुर्थी, नादः पञ्चमी, बिन्दुः षष्ठी, कला सप्तमी, कलातीताष्टमी, शान्तिर्नवमी, शान्त्यतीता दशमी, उन्मन्येकादशी, मनोन्मनी द्वादशी, पुरी त्रयोदशी, मध्यमा चतुर्दशी, पश्यन्ती पञ्चदशी, परा षोडशी इति। पुनः चतुःषष्टिमात्रा प्रकृतिपुरुषद्वैविध्यमासाद्याष्टविंशत्युत्तरभेद-मात्रास्वरूपमासाद्य सगुणनिर्गुणत्वमुपेत्यैकोऽपि ब्रह्मप्रणवः सर्वाधारः परं ज्योतिरेष सर्वेश्वरो विभुः। तथाहि –

**स एव देवमयः सर्वप्रपञ्चाधारगर्भितः॥**
**सर्वाक्षरमयः कालः सर्वागममयः शिवः।**

**सर्वश्रुत्युत्तमो मृग्यः सकलोपनिषन्मयः॥**
**भूतं भव्यं भविष्यद् यन्त्रिकालोदिताव्ययम्।**
**तदप्योङ्कारमेवायं विद्धि मोक्षप्रदायकम्॥**
**तमेवात्मानमित्येतद् ब्रह्मशब्देन वर्णितम्।**
**तदेकममृतमजरमनुभूय तथोमिति॥**
**सशरीरं समारोप्य तन्मयत्वं तथोमिति।**
**त्रिशरीरं तमात्मानं परब्रह्म विनिश्चिनु॥**
**परं ब्रह्मानुसन्दध्याद्विश्वादीनां क्रमं क्रमात्।**
**स्थूलत्वात् स्थूलभुक्त्वाच्च सूक्ष्मत्वात् सूक्ष्मभुक् परम्॥**
**ऐक्यत्वानन्दभोगाच्च सोऽयमात्मा चतुर्विधः।**
**चतुष्पाज् जागरितः स्थूलः स्थूलप्रज्ञो हि विश्वभुक्॥**[45]

प्रत्येकस्मिन् जीवे वृक्षे लतायामर्थान् सर्वेषु चेतनपदार्थेषु स्पन्दनं–नादः–ज्योतिराकाशरूपेणावस्थितः व्यष्टि–प्रणवः इति अभिनवप्रणववादस्याचार्यमतम्। तस्य प्रणवप्रेमपीयूषे भाष्ये उच्यते यथा सर्वव्यापिनी ओङ्काररूपिणी महाशक्तिः प्राण एव समष्टि–प्रणव इति। अपि च अर्धमात्राप्रणवः अर्धमात्रेति। अत एव परप्रणव–अपरप्रणवौ उभावेव सर्वम्। श्रीओङ्कारनाथदर्शने अनुभूतिरेव प्रधाना। अतस्तेनोच्यते अनुभूतिमाध्यमेन श्रुत्या युक्त्या च तत्त्वस्य प्रतिष्ठा भवतीति। अतस्तस्य दर्शने साधनं तदनुकूला अनुभूतिश्च प्रतिष्ठिता। मूलाधारं तु परास्थानं, तच्चतुर्दशपद्माकृतिविशिष्टम्। अस्य प्रत्येकदलं परास्थानमिति एवमेकैकदलं क्रमेण पूर्वोक्तायां षोडशमात्रायां चतुर्गुणितायां सती चतुःषष्टिमात्रा भवति। प्रकृतिः–पुरुषश्चेति द्विविधालम्बनभेदेन अष्टाविंशत्युत्तरशतमात्रा भवति। येन मात्राप्रभावेण मनोलयो भवति सैव मनोन्मनी। लयोऽयं न तु चरमः। पुरुषमवलम्ब्य ध्यायी मूलाधारे चतुर्दलेषु प्रत्येकस्मिन् दलत्रये प्रणवस्य षोडशमात्रां ध्यायन् चतुर्थे दले 'अ–उ–म' इत्यादिक्रमेण उन्मनी–मनोन्मनी–पुरी–पश्यन्ती–मध्यमा–परा–एवंरूपे ध्याने यः मनोलयो भवति स एव प्रकृतः लयः। प्रकृतिमवलम्ब्य ध्याने चित्तस्य यः लयो भवति, तत्र पुनः चित्तस्योत्थानावकाशः प्रसङ्गः जायते। प्रकृतिः, महद्, अहङ्कारः, शब्दादि–पञ्चतन्त्रमात्र–एकादशेन्द्रियाणि, क्षित्यादि–पञ्चभूतानीति चतुर्विंशतितत्त्वम्। तदनन्तरं जीवात्मा, परमात्मा, धर्मः, अधर्म, ज्ञानम्, अज्ञानं, वैराग्यमवैराग्यमैश्वर्यमनैश्वर्यमभिमानः संसारश्चेति चतुःषष्टिमात्राविशिष्टस्य प्रणवस्य ध्याने तुरीयातीतावस्थां लभते। विदेहमुक्तिरिति एषाऽवस्था।

श्रीओङ्कारनाथेनोक्तं प्रणवनादः मानवस्य स्थूले सूक्ष्मे कारणे च शरीरे यां लीलां करोति, प्लुतेति तस्य नाम। अपि च विराड्ब्रह्माण्डं परिव्याप्य योऽङ्कारनादश्चलति, नादसागरे यज्जगत् क्रीडति स विराट् प्लुतः, यन्नादश्च सुषुम्नायां ध्वनितो भवति, यमोङ्कारनादम् अवलम्ब्य जीवः परमे नादे लीनो भवति तदेव प्लुतसंहारेति। कारणे, सूक्ष्मे, स्थूले च त्रिदेहे ओङ्कारनादस्य विद्यमानता तेन स्वीकृता। यतो हि सर्वमेव न ओङ्काराद् भिन्नम्। अयं ब्रह्मप्रणवः षोडशमात्रात्मकः। सोऽवस्था चतुष्टय–चतुष्टयगोचरः। जाग्रदवस्थाया जाग्रदादि–चतस्रोऽवस्थाः, स्वप्ने स्वप्नादिचतस्रोऽवस्थाः, सुषुप्तौ सुषुप्त्यादि-चतस्रोऽवस्थाः, तुरीये तुरीयादि–चतस्रोऽवस्थाः भवन्तीति। जाग्रदवस्थायां विश्वस्य चातुर्विध्यं यथा –

1. विश्व–विश्वम्, 2. विश्व–तैजसम्, 3. विश्व–प्राज्ञम्, 4. विश्व–तुरीयम् इति। स्वप्नावस्थायां तैजसस्य चातुर्विध्यं विवर्ण्यते यथा – 1. तैजस–विश्वम्, 2. तैजस–तैजसम्, 3. तुरीय–प्राज्ञम्, 4. तुरीय–सुरीयमिति। अतः एवंरूपा प्रणवस्य षोडशमात्रा। यथा – अकारे जाग्रद् विश्वम्, उकारे जाग्रद्–तैजसं, म–कारे जाग्रद् प्राज्ञम्, अर्धमात्रोयं जाग्रद्–तुरीयमिति। बिन्दौ स्वप्न–विश्वम्, नादे स्वप्न–तैजसम्, कलायां स्वप्न–प्राज्ञं, कलातीतायां च स्वप्न–तुरीयमिति। शान्त्यवस्थायां सुषुप्ति–विश्वं, शान्त्यतीतायां सुषुप्त–तैजसम्, उन्मन्यवस्थायां सुषुप्त–प्राज्ञं, मनोन्मन्यौ तु सुषुप्त–तुरीयम्। पुर्यौ तुरीय–विश्वं, मध्यमायां तुरीय–तैजसं,पश्यन्त्यवस्थायां तुरीय–प्राज्ञं, परायां तु तुरीय–तुरीयमिति। जाग्रन्मात्राचतुष्टयात्मकः अ–कारांशः, स्वप्नमात्राचतुष्टयात्मक उ–कारांशः, सुषुप्तिमात्रा-चतुष्टयात्मकः मकारांशः, तुरीयमात्राचतुष्टयात्मकश्चार्धमात्रांशः। ओङ्कारनादोऽयं च परमं पदम्। यतो हि शास्त्रेषु वर्णितमस्ति –

**पदं स्थाने परित्राणे व्यवसायोपदेशयोः।**
**वस्तुनि वाचि शब्दे च पादतच्चिह्नयोरपि॥**

अयमोङ्कारस्य प्रणवस्य वा कर्यावस्थाः भूतेन्द्रियमनः प्राणाः, इच्छाशक्तिः, क्रियाशक्तिश्च। यदा चलनं नास्तीति अनुपहिते ब्रह्मणि तदा सः परप्रणवः इति। अपि च यदा चैतन्यमुपहितं वर्तते तदा स अपरप्रणव एव। अत्र श्रीओङ्कारनाथदेवेन माया स्वीकृता, अपि सा माया न तु शङ्कराद्वैतसम्मता। न तु शक्तिविशिष्टाद्वैतवादसम्मता। यतो हि ओङ्कारस्य अन्यतमाशक्तिरूपेण माया न स्थिता अभिनवप्रणववाददर्शने। यथा चेतने चेत्यभावः स्पन्दधर्मी, यथा अग्नौ उत्तापः, यथा चन्द्रस्य च कौमुदी तथैव सम्बन्धो विराजते अत्र। 'मा' – धातोः माया इति पदं समुत्पन्नं जातम्। 'मा' –

धातोरर्थः ज्ञानम् यस्मिन्नर्थे प्रमाणमिति प्रयुज्यते। अपरोऽर्थः परिमाणमिति। अतः परिच्छिन्नार्थे ज्ञानार्थे माया–शब्दस्योपगिता अत्र। अभिनवप्रणववादे माया–शब्दस्य पारिभाषिकप्रयोगः श्रीरिति क्वचिच्च दृश्यते। श्रीमद्भागवद्गीतायाः प्रणवप्रेमपीयूषे भाष्ये दृश्यते श्री–पुटिताः श्लोकनिचयाः। सर्वं हि कार्यमर्थात् सृष्टि–स्थिति–लयञ्च मायावशात् गृह्यते। यतो हि परप्रणवस्य न किमपि कार्यमस्ति। अथर्वशिरोपनिषदि एवमुक्तं यत् – नास्ति यस्य प्रपञ्चं स एव प्रणव इति। अपि च वर्णसमूहाणामभिव्यञ्जकत्वाद् ओङ्कारः प्रणवो वा महानाद इत्यभिधीयते।

व्यस्तसमस्तभेदेन द्विविधः प्रणवोऽयम् – अ–उ–म इति तस्य व्यस्तरूपम्, ओमिति तस्य समस्तरूपञ्च। इदं नामरूपात्मकं जगद् ओङ्कारस्य विकृतिमात्रम्। अत्र विशेषा आकृतिः बोद्धव्या विकृतिपदेन। जगति यद् रूपं प्रतिभातमस्ति तदेव नाम इति। नाममात्रेण शब्दश्च गृह्यते। श्रीओङ्कारनाथदेवेन परा–पश्यन्ती–मध्यमा–वैखरीभेदेन शब्दस्य चतुर्विधा अवस्था स्वीकृता। अत्र आशङ्का जायते तर्हि अभिनवप्रणववादः शब्दाद्वैतवाद एव। तन्न, परावादः ओङ्कारस्य वा शब्दमयता शब्दतत्त्वविश्लेषणस्वातन्त्र्यात्। तन्मते धर्म–अर्थ–काम–मोक्षा इति पुरुषार्थचतुष्टयम्। एतेषां कश्चिदपि एकः शब्देन विना न सम्पद्यते। यतो हि शब्दः स्पन्दनं विना न सम्भवति। स्पन्दोऽयं भावनेति। एषा भावना धर्मे अर्थे कामे अपि मोक्षसाधनपथे च प्रयोजनीया।

**अभिनवप्रणववादस्य नूतनता**

सर्वे दर्शनसम्प्रदायाः तेषां साधनमार्गं प्रदर्शयन्ति। अस्मिन् अभिनवप्रणववादे नामप्रणामौ साधनमूलौ। यतो हि नाम एव अस्मान् निकषा बहुरूपेण प्रतिभातमस्ति। अतः तद्–बहुदर्शनलये नाम एव साधनस्वरूपमिति। आस्तिकेषु भारतीयदर्शनेषु मोक्ष एव परमपुरुषार्थः। शङ्करभगवत्पादैरपि अधिकारिनिरूपणावसरे साधनचतुष्टयस्योल्लेखः कृतः। एवं तु रामानुजाचार्येण मध्वाचार्येण वल्लभाचार्येण च तेषां मोक्षशास्त्राधिकारिनिरूपण-प्रसङ्गः वर्णितः। एतस्मिन् स्थले तु अभिनवप्रणव–वादस्याचार्यस्याभिनवत्वम् उल्लेखनीयम्। यतो हि कालानुरोधेन प्रयोगपद्धतिरपि परिवर्तते। तेनोच्यते शुद्धाहारः, सदाचारः, काले उपासना – एते सर्वे साधनानुकूलाः। अनधिकारिणस्तु किं कर्तव्यम्? नामसंकीर्त्तनेन प्राणवायुः क्रमशः ह्रासप्राप्तो भवति। अनन्तरं चित्तचाञ्चल्यं दूरीभूतं भवति। उल्लेखनीयं यत् विषसन्दर्शने नासाग्रवर्त्ति–वायुः प्राणः उत्तेजितो भवति। एषावस्था न तु जपानुकूला। नामजपात् नामसंकीर्तनम् अधिकतरमनायाससाध्यम्। अन्ते तु एषा वैखरी वाक् मध्यमामनुपश्यति। यतः –

**वैखरी मध्यमायास्त्वां सान्निध्यं प्रापयिष्यति।**
**सात्त्विकाः सकला भावास्तत्रैव समवस्थिताः॥**[46]

नामैव बन्धमोक्षयोः कारणम्। नामसंकीर्तनमिदं प्रथमं जपे तदनन्तरम् उपांशुजपे अनन्तरं मानसजपे तदनन्तरं पश्यन्त्यावस्थायां प्रत्यावृत्तं भवति। अन्ते तन्नाम द्रवीभूय प्रकृतौ ओङ्कारे विलीयते। अतः दृश्यते प्रकृति–ओङ्कारस्य विकृतिविशेषं इदं नाम। तन्नामसादनेनैव संस्कृतिमाध्यमेन च प्रकृति–ओङ्कारे समवलीयते। अतः नाम ओङ्काराद् न भिन्नः, ओङ्कारात्  सकलवर्णमालासृष्टिरिति प्रसिद्धत्वात्। तन्मते देहे यदा वायुः प्रविशति तदा तस्य परिमाणं दशाङ्गुलं, यदा च निर्गच्छति तदा तस्य परिमाणं दशाङ्गुलमिति। स्वाभाविकी एषाऽवस्था। द्वादशाङ्गुलपरिमाणाधिक्ये देहक्षयो भवति। प्रणवप्रेमपीयूषे भाष्ये दृश्यते सङ्गीते षोडशाङ्गुलं, भोजने विंशत्यङ्गुलं, गमने चतुर्विंशत्यङ्गुलं, निद्रायां त्रिंशदङ्गुलं, मैथुने षड्विंशत्यङ्गुल–परिमाणो वायुर्निर्गच्छति। चिदानन्दघनेन नामकीर्तनेन वायोः गतिः भिन्नमुखी नादे आसक्ता भवति। श्वासस्य गतिन्यूनतायां मानवाः क्रमशः परमानन्दं लभन्ते। यथा एकाङ्गुलन्यूनतायां सति प्राणे निष्कामता आगच्छति; द्व्यङ्गुलन्यूनतायामनन्दः, त्र्यङ्गुलन्यूनतायाञ्च कवित्वशक्तिः, चतुरङ्गुलन्यूनतायां वाक्यसिद्धिः, पञ्चमे दूरदृष्टिः, षष्ठे आकाशगमनं, सप्तमे चण्डवेगः, अष्टमे चाष्टसिद्धिः, नवमे नवनिधिः, दशमे दशमूर्तिः, एकादशे छायानाशः, द्वादशे च परमहंसावस्था प्राप्ता। तदा कालोऽपि न तस्य भोजने समर्थोऽस्ति। केवलं नामकीर्तनेन एषाऽवस्थालाभ-सामर्थ्यमागच्छतीति तस्य मतम्।

अभिनवप्रणववादे सृष्टिः चेतनात्मिका। चेतनायाः सर्वेषु स्तरेषु अयमोङ्कारः विराजते। ओङ्कारस्य अकारः उकारः मकारः अर्धमात्रा च स्थूलांश–सूक्ष्मांश–बीजांश–साक्षि–अंशभेदेन षोडशमात्रात्मकाः। यथा – अकारः स्थूलांशे जाग्रद्–विश्वं, सूक्ष्मांशे जाग्रत् तैजसं, बीजांशे जाग्रत् – प्राज्ञं, साक्षि–अंशे च जाग्रत् – तुरीयमिति। उकारश्च स्थूलांशे स्वप्न–विश्वम्, सूक्ष्मांशे स्वप्न–तैजसम्, बीजांशे स्वप्नप्राज्ञं, साक्षि–अंशे च स्वप्न–तुरीयमिति। मकारः स्थूलांशे सुषुप्त–विश्वं, सूक्ष्मांशे सुषुप्त–तैजसं, बीजांशे सुषुप्त–प्राज्ञं, साक्षि–अंशे–सुषुप्त–तुरीयमिति। अर्धमात्रा च स्थूलांशे तुरीय–विश्वं, सूक्ष्मांशे तुरीय–तैजसं, बीजांशे तुरीय–प्राज्ञं, साक्षि–अंशे तुरीय–तुरीयमिति। अभिनवप्रणववादे ईश्वर–हिरण्यगर्भ–विराडिति प्राज्ञ–तैजस–विश्वमिति च शङ्कराद्वैतवादानुसारि, किन्तु वादेऽस्मिन् ईश्वरः मन इति हिरण्यगर्भ इच्छेति विराट् क्रियेति रूपेण उच्यते। अद्वैतवादे हिरण्यगर्भे मनोऽस्ति न तु ईश्वरे। श्रीओङ्कारनाथदेवेन प्रसङ्गेऽस्मिन् उच्यते यदि ईश्वरे

मनः न स्वीक्रियते तर्हि व्यस्तरूपे तस्य सत्तास्वीकारे आपत्तिरस्ति। यतो हि अभिनवप्रणववादे ओङ्काराद् परप्रणवाद्वा भिन्ना अपरसत्ता नास्तीति, अत एव ईश्वरे मनसः सत्ताया अस्वीकारे ओङ्कारस्यैव अङ्गहानिर्भवति। एतत्तु नाभिप्रेतम्। प्रत्येकस्मिन् जीवे तुरीयः पादः वर्तते। यतो हि जीवात्मापि प्रणवात् न भिन्नः। अपि च शब्दः घनीभूय जगद्रूपेण समुत्पद्यते। जीवोऽपि शब्दात्मकः। अतः शब्दः विभिन्नेषु स्तरेषु जीवसत्तायां भिन्नभिन्नरूपं परिगृह्णाति। सुषुप्त्यवस्थायामपि एतद् वक्तुमर्हति यज् जीवः प्रकृतिछन्दसि विराजते, किन्तु तुरीयावस्थायाः सुषुप्त्यवस्थायाः पार्थक्यमिदं अनुभवदृशा दृश्यते। तथा तुरीये स्तरे जीवस्यानुभवः सर्वं खल्विदं ब्रह्म इति, ईशावास्यमिदं सर्वमिति।

अस्यामवस्थायां सर्वमेव तेन ज्ञातम्। सुषुप्त्यवस्थायां तु किञ्चिदज्ञातम्। यतः सुषुप्तेरनन्तरम् अयमनुभवः गम्यते यथा 'सुखमहमस्वाप्सं न किञ्चिदवेदिषमि'ति। अनुभवेऽस्मिन् स्पष्टतया सुखमिति 'अस्ति' ज्ञानं प्रतिभाति; 'न किञ्चिदवेदिषम्' इति ज्ञाने अज्ञानञ्च प्रतिभाति। सुषुप्त्यवस्थायां साक्षी न लीयते। अतः साक्षिणः सत्तायां चलनसत्ता स्पन्दनसत्ता वा अवतिष्ठते। अपरप्रणवात्मिका एषाऽवस्था। सुषुप्त्यवस्थाया अनन्तरं जाग्रदवस्था स्वप्नावस्था वाऽविर्भूयते, किन्तु प्राप्तायां तुरीयावस्थायां सर्वप्रकारकमज्ञानं विनश्यति, पुनः तस्यागमनमसम्भवम्। अज्ञानस्यात्यन्तिकविनाशात्।

अभिनवप्रणववादे पारिभाषिकतया श्रीः अर्थाद् माया अपरप्रणवस्य शक्तिरिति कथ्यते न तु परप्रणवस्य। श्रीरियम् उपनिषत्प्रसिद्धा ओमिति। 'उमा' इति पदे 'उ–म–अ' पदत्रयं विद्यते। ओङ्कारस्य व्यस्तरूपेऽपि 'उ–म–अ' पदत्रयं विद्यते। अतः परप्रणवाद् ओङ्काराद् वा अपरप्रणवः तस्य च शक्तिः न भिन्ना। शक्तिशक्तिमतोरभिन्नत्वाद्। ईश्वरस्तु अपरप्रणवः। अत्र चलनं विद्यते। अतः जगतः निमित्तकारणम् अयमपरप्रणवः। शब्दं कारयति इत्यस्माद्। अपि च परप्रणवः जगतः उपादानकारणम्। शब्दायते इत्यस्माद्। अपरप्रणवः परप्रणवात् न भिन्नम्। अतः जगतः निमित्त–उपादान–उभयकारणं परप्रणव इति। यतो हि जगति स्थूलविकारसमूहः अभिनवप्रणववादे ओङ्कारविकृतिरिति व्यपदिश्यते। यथा – सूर्य–प्रभृति आधिदैविक–स्थूलविकारः ओङ्कारस्य। पशुपक्षिवृक्षलतादि–जीवाः आधिभौतिक–स्थूलविकारः। इन्द्रियादिः आध्यात्मिकस्थूलविकारः।

साधनमार्गी अभिनवप्रणववादे भक्तिः स्वीकृता। अतस्तर्हि वादोऽयं विशिष्टाद्वैत-मतानुसारि आहोस्वित् स्वतन्त्रः। समाधाने उच्यते – वादोऽयं न तु विशिष्टाद्वैतमतानुसारी। यद्यपि ओङ्कारनाथदेवेन भक्तिमहिमा प्रकीर्तितः स्वकीये प्रपन्नपथिके भक्तिपथमितिभागे। किन्तु तन्मते प्रकृत्या भक्तिरेव ओङ्कारः। केचन मन्यन्ते वाचि अनुरागः भक्तिरिति।

पूजादिष्वनुरागश्च भक्तिरिति केचित्। ईश्वरे परानुरक्तिरित्यपरे। केचिच्च मन्यते आत्मानुसन्धानं भक्तिरिति। निगमने अभिनवप्रणववादस्याचार्यस्य मतम् – भक्तिः चेतनात्मकस्य मनसः भाव इति। अतः मनः यदा स्थूले स्तरे विराजते तदा तत्स्तरीयोपचारेण पूजा एव भक्तिः। तदा पुष्पचन्दनधूपदीपनैवेद्यं चोपचारः भवति। यदा चित्तं सूक्ष्मे अवतिष्ठति तदा क्षितिरूपि–गन्धेन, आकाशरूपि–पुष्पेन, वायुरूपि–धूपेन, तेजोरूपि–दीपेन रसरूपि–नैवेद्येन च पूजा कर्तव्या। अपि च मनः यदा कारणस्तरे विराजते तदा अ–कार उ–कारं गच्छति, उ–कारः मकारे, मकारश्च नादे, नादः बिन्दौ, बिन्दुं कलायां, कला च कलातीतमाप्नोति। अनया कलातीततया परमात्मनः पूजा विधेया। अतः भक्तिरेव ओङ्कारे पर्यवसिता।[47] गीताभाष्ये तेनोक्तम् –देवता ओङ्कारः, पुष्प ओङ्कार, चन्दनम् ओङ्कारः, हस्त ओङ्कारः, पुष्पदानमोङ्कारः, पुष्पदानम् ओङ्कारः, नैवेद्यमोङ्कारः, निवेदनमपि ओङ्कारः, प्रसाद ओङ्कारः, प्रणम्य ओङ्कारः, प्रणाम ओङ्कारः, प्रमाणकर्ताऽपि ओङ्कारः।[48]

श्री–गोविन्द–भगवत्पूज्यपाद–शिष्यस्य परमहंस–परिव्राजकाचार्यस्य श्रीशङ्कर–भगवतः कृतावाथर्वणोत्तरतापनीयोपनिषदः रहस्यार्थ–दीपिकायां दृश्यते – अकारः पुरुषस्तत्र हकारः प्रकृतिः परा। तथा प्रणवगोकारो बीजात्मा पुरुषः स्मृतः। उकारः शक्तिरूपत्वात् प्रकृतिः सा हरूपिणी। पुम्प्रकृत्यात्मका वर्णास्तस्मात्तन्मध्यगाः सदा। क्षराक्षरपरो देवो मकारः परमेश्वरः। अथवाकार एवायं चिन्मात्रः परमेश्वरः। सर्वप्रकाशको देवो ह्युकारः सर्वभासकः। न हि तेन विना वर्णप्रकाशः क्वापि क्वचित्। कार्यञ्च कारणं सर्वमुकारः शक्तिरूपवान्। उकारमत एवात्र जगत्प्रसवरूपतः। उच्चरन्त्यतिदीर्घेण सृष्टि–स्थितिलयात्मना। कार्य–कारणरूपेण महेशादात्मनोद्गतम्। तमेवमात्मकं भूयः प्रविश्यात्मस्वरूपिणम्। तावन्मात्रत्वमायाति मकारो हि महाचितिः। अकारः सोमरूपोऽर्थ उकारः सूर्य एव तु। मकारश्च महावह्निरिति तेजस्त्रयात्मकः। षोडशात्मा भवेत्सोमः षोडशस्वररूपवान्। सूर्यो द्वादशमासात्मा मासाश्च द्विविधा मताः। अयनद्वयभेदेन सृष्टिसंहाररूपतः। संसारमोक्षभेदेन तथाहोरात्रभेदतः। कभाद्रिवर्णरूपास्ते सृष्टिसंहाररूपतः। मकारः कालकलितः परमात्मा महेश्वरः। आदित्यान्तर्गतो देवः कालकालो महाप्रभूः। सर्वसंहार–वह्न्यात्मा साक्षी चिन्मात्रविग्रहः। पुरुषः पञ्चविंशोऽयं षड्विंशस्तु महेश्वरः। पञ्चविंशात्मना भोक्ता षड्विंशो भोजको मतः। उभयात्मा मकारोऽयं प्रणवस्थ उदाहृतः। भोक्ता तत्राग्निरूपः स्याद्देशभेदयुतः स च। सप्तधातुत्रयाधारो भेदतोऽस्मिन् कलेवरे। अकारादि–क्षकारान्ता वर्णास्तद्भेदरूपिणः। मकारस्तु समष्ट्यात्मा भोक्तृ–भोजक–रूपवान्। अतः सर्वात्मकस्तारः साक्षात् सर्वेश्वरः स्वयम्। सर्वतेजोऽनुगश्चैव सर्ववर्णात्मकः स्वयम्। अपरः प्रकृतेर्यद्वा वाचकोकार इष्यते। सन्मात्र–बीजरूपेण सर्वत्रा तु गता हि सा।

अकारः सर्ववर्णेषु तथैवेहान्वितः सदा। तस्मात्तद्वाचकोकारस्तदभिन्नः सदा भवेत्। उन्मुखो स्यादुकारोऽयं तस्या उद्गातृ–साक्षिणः। व्याप्तेर्बलस्य चाधिक्याद-कारादुद्गतो ह्यसौ। तद्वत् सात्मात्मिका शक्तिः साभासबलसंयुता। उकारोऽतस्तदात्मा स्यात्तदाभासामृताप्लुतः। मकारो महतो बोधः केवलस्य महात्मनः। निराभासमहासंविदानन्दैकस्वरूपिणः। इति शब्दान्तरेभ्यो-ऽयमोङ्कारः परमो मतः। वर्णा वर्णान्तरेभ्यश्च सारभूताः परा मताः।

श्रुतावप्युक्तं यथा भूतं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव। यथा प्रतिज्ञातमुपव्याख्यानमेवानुवर्तयते भूतमित्यादिना। भूतं भवद्भविष्यदित्येवं कालत्रय-परिच्छिन्न–कार्यजातमित्यर्थः। तच्च द्विविधं – स्थूलं सूक्ष्मं चेति। तत्र स्थूलं समष्टिव्यष्ट्यात्मकं विराड्रूपं सूक्ष्मं तु समष्टिव्यष्ट्यात्मकं हिरण्यगर्भरूपं तयोरुभयोरपि प्रणवात्मकतामाह सर्वमोङ्कार एवेति। ननु भूतं भवद्भविष्यदिति सर्वमकारोकारावेवेति च वक्तव्यं विराड्–हिरण्यगर्भयोर्ह्युत्तरत्राकारोकारात्मकत्वमेवोच्यते न तु समस्तप्रणवात्मकत्वम्। अत्रापि भूतं भविष्यदिति तावेवोक्तौ तयोरेव दिक्कालपरिच्छेदसम्भव इति। यच्चान्यत्त्रिकालातीतमित्य-व्याकृतादेः पृथक्कथनाच्च। यद्येवं तर्हि ओङ्कारैकदेशात्मनावपि विराड्हिरण्यगर्भावुपचारेण ओङ्कारात्मानावित्युक्ताविति चेन्न श्रुत्यर्थपरित्यागप्रसङ्गात्। तर्हि सामान्येन ओङ्कारमात्रं सर्वमित्युच्यते इति चेत्, यद्येवं तर्हि कालत्रयपरिच्छिन्नं तदपरिच्छिन्नञ्च सर्वमनूद्य पुनः सर्वमेतदोङ्कार एवेति वक्तव्यम्। ननु जगदेकदेशमेवानूद्य अयमथोङ्कार एवेति च वचनमनुपपन्नं सामान्येन च सर्वात्मत्वमोमित्येतदक्षरमिदं सर्वमिति। अतो विराड्हिरण्यगर्भाव्याकृत-सन्मात्रशरीराणां प्रत्येकं सर्वात्मकत्व–प्रणवात्मकत्वमेवात्रोच्यते। ननु एकस्यैवोङ्कारस्यैकस्मिन्नेव प्रयोगे कथं सर्वात्मना शरीरचतुष्टयात्मत्वं सम्भवति न एकस्यैव प्रणवस्य वैखर्यादिरूपेण प्रत्येकं सर्वात्मकत्वादिति ब्रूमः। वैखर्यास्तावदक्षयरूपिण्या अकारोकार–मकरार्धमात्र–प्रणवात्मकत्वं प्रत्यक्षसिद्धं मध्यमा–पश्यन्ती–परारूप–प्रणवस्यापि वैखर्याद्यविभाग–रूपत्वेन सर्वात्मकम् अभ्युपगन्तव्यम्। एवं सति प्रत्येकं चतूरूपत्वेन वक्ष्यमाणानां विराडादीनां वाचकत्वं सम्भवति ओङ्कारस्य। अकारादीनामपि चतूरूपाणामेव विराडादि–वाचकत्वं वक्ष्यति विश्वो वैश्वानरश्चतूरूपोऽङ्कार एवेत्यादिना। अकारादयो हि बीज–बिन्दु–नाद–शक्ति–रूपस्वात्मभेदे वाक्–चतुष्टयरूपा एव। न हि वैखर्यादिरूप–चतुष्टयरहितः शब्द एवास्ति लोके। उक्तञ्च वाक्चतुरात्मत्वम् उत्तरोत्तरं सौक्ष्म्यञ्च। चत्वारि वाक्परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति। तस्माद्वैखर्यादि–रूपस्यैवोत्तरोत्तरसूक्ष्मस्य तथारूप–विराडादि–वाचकत्वेन विराडाद्यात्मकत्व–मन्त्रोक्तं यावद्ब्रह्मवेष्टितं तावती वागिति वाक्यान्तरम्। तत्राकारोकार–

मकारार्धमात्रात्मा अस्मदादि–श्रोत्रग्राह्यः क्रियाशक्ति–प्रधानो वैखर्यात्मा तत्प्रधानः प्रणवो विराजो वाचकः। उभयोः स्वरस्य काठिन्यस्य च साम्यात्। विशेषेण स्वरत्वाद्वैखरीत्युच्यते वैखर्युच्चारणात् पूर्वमकारादि–मात्राचतुष्टय–रूपेणैव मनस्युद्भूतः क्रमादि–विशिष्ट–वर्ण–विमर्शात्मा ज्ञानशक्ति–प्रधानो मध्यमा–वागात्मा स तत्प्रधानप्रणवो हिरण्यगर्भवाचकः मनोरूपत्वसाम्यादुभयोः। सा च मध्ये वर्तते चेति मध्यमेति उच्यते। एवं विराड्–हिरण्यगर्भयो र्वक्ष्यमाण–प्रकारेण चतुरात्मना मध्यमा–वैखरीरूप–चतुर्मात्र–प्रणवात्मत्वमभिधाय समष्टि–व्यष्टि–सुषुप्तात्मकस्याव्याकृतस्य समस्त–जगद्वासना–विशिष्टतया किञ्चिद्बहिर्मुख–सदात्मकस्य कारणशरीरस्य अन्तर्मुखसदात्मक–सामान्य–शरीरस्य च ब्रह्मज्ञानात्मनः क्रमेण पश्यन्ती-परावाग्रूपप्रणवरूपतामाह यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एवेति। मध्यमा–विशेषज्ञानात् पूर्वमक्रमबहिर्मुख–स्पन्दनमात्ररूप–सामान्य–ज्ञानात्मक इच्छा–शक्तिप्रधानः पश्यन्त्यात्मा प्रणव उक्तरूप–कारणशरीरवाचकः पश्यद्रूपत्वाविशेषात्। परित्यक्त–सर्वस्पन्दः केवल–सन्मात्रतयावस्थितः स्वातन्त्र्यशक्तिः सदात्मा परावाग्रूपः प्रणव उक्तरूप–सामान्यशरीरवाचकः परत्वसामान्यात्। उक्तवाच्यानाञ्च उक्त–वाचक–व्यतिरेकेणानुपलब्धेः। सर्वमोङ्कार एवेति युक्तम्। ओङ्कारस्य सर्व–वाच्य–वाचक–कल्पना–रहित–चिन्मात्ररूपत्वञ्च यच्चान्यद् इति अनेन एवोक्तम्। न हि चिद्रूपत्वं विना प्रणवस्य बाधकत्वं सम्भवति।

श्रीओङ्कारनाथदेवमते वदनसामर्थ्य–स्फुरणमेव सच्चिदानन्द ब्रह्म इति। यदा शब्द उच्चार्यते परा–पश्यन्ती–मध्यमा–वैखरी इति क्रमेण शरीराधिष्ठितं ब्रह्म एव तदा प्रकाशते। स एव शब्दः उपचारक्रमेण नित्य इत्युक्तम्। आचार्यः शङ्करोऽपि वदति यद् उरसः शब्दः श्रूयते न तु बोध्यते, तारत्वादेः ज्ञानमात्रं जायते। एवंरूपं ज्ञानं ध्वनिरित्युच्यते। अत्र श्रीओङ्कारनाथदेवेन स्पष्टतया उक्तं यत् ध्वनिरेव श्रवणसामर्थ्यो वा स्फोट इति शाङ्करमते, अस्मन्मते तु स्फोट एव सच्चिदानन्द ब्रह्म इति। अतः ध्वनिरपि सच्चिदानन्दरूपम्। एतेन सच्चिदानन्द–ब्रह्मणा श्रवणसामर्थ्यं वदनसामर्थ्यं दर्शनसामर्थ्यमित्यादीनि तावदिन्द्रियसामर्थ्यमवभासते। इन्द्रियसमूहाः गोलोकमात्रमेव। अतः एतेन सच्चिदानन्द–ब्रह्मणा चिदाकाशेन वा शब्दब्रह्मेति ज्ञायते। गीतायामप्युक्तम् – "शब्दः खे।" अर्थादाकाशस्य यः गुणः तदहमस्मि, शब्दस्यावबोधक अपि च तत्सारभूताः ये पदार्थसकलाः ते सर्वे ब्रह्मचैतन्यमिति। यावद्ब्रह्माण्डः अस्ति तावत् महानादसागरे अनन्तकोटिब्रह्माण्डस्य प्रकाशः तरङ्गरूपेण वर्तते। शब्दः घनीभूय ब्रह्माण्डाकारेण परिणमते। यथा घट इति प्रकथने मृत्तिकेत्येव बोध्यते तथा ब्रह्माण्ड इति कथने नादातिरिक्तं न किञ्चिदवगम्यते। अपि तु सूक्ष्म–अव्यक्त–साम्यावस्थायां विद्यमाना प्रशान्ता परमेशशक्तिः स्फोटो भवति।[49]

अभिनवप्रणववादे अत्र मौलिकमतन्मुमोचितम् – 'जगद्रसतम–शब्दब्रह्म–ओङ्कारस्य घनीभूतमूर्तिरिति। विविधाकारेण परिदृश्यमानं जगत् नादब्रह्म इति नान्यत्किञ्चिदपि।'[50] ईश्वरः वाच्यः वाचकस्तस्य प्रणव इति पतञ्जलिना।[51] श्रीमदोङ्कारनाथमते तु वाचकः वाच्यादभिन्नः, नामनामवन्तौ अपि अभिन्नौ इति। अतः ओङ्कारनाथदर्शने स्फोटरूपे ओङ्कारे वाच्य–वाचकभावरूपः, बोध्य–बोधकभावरूपश्च कोऽपि द्वैतभावो भेदो वा नास्ति। प्रणव एव ब्रह्म। स एव परापरारूपेण स्वात्मानं प्रकाशयति।

अन्यत्र पश्यामः श्रीओङ्कारनाथमते बृहदारण्यकोपनिषदि 'पूर्णमदः' मन्त्रेण ओङ्कारस्य सर्वात्मकत्वमेव प्रतिष्ठापितम्। पूर्णमदः इति पदस्य परप्रणवः सर्वव्यापीत्यर्थः तेन स्वीकृतः। 'पूर्णमिदम्' इत्यस्यार्थश्च अपरः प्रणवः अनन्त इति। 'पूर्णात्पूर्णमुदच्यते' अर्थात् परप्रणववादपरप्रणव उद्गतो भवति। 'पूर्णस्य पूर्णमादाय' अर्थादपरप्रणवस्य पूर्णत्वे सर्वव्यापित्वे वा गृहीते 'पूर्णमेवावशिष्यते' परप्रणव एवावशिष्यते इत्यर्थः। एवम् ईश–केन–कठ–माण्डूक्य–तैत्तिरीय–छान्दोग्य–बृहदारण्यकादीः श्रुतीः पर्यालोच्य ओङ्कार एव ब्रह्म इति सिद्धान्ते तस्य दर्शनं प्रतिष्ठितम्। तद्ब्रह्म ओङ्कारो वा निर्गुण–निर्विकार–नित्य–शुद्ध–बुद्ध–मुक्त–सत्य–ज्ञान–आनन्दस्वरूप इति। अपि च अपरप्रणव एव ब्रह्मशक्तिः, हिरण्यगर्भः अस्य नामान्तरम्। सूत्रात्मा, सगुणं ब्रह्म, मायाधीश्वर अपि तस्य रूपम्। अतः विदिते ओङ्कारे सर्वं तत्त्वविज्ञानं सम्भवतीत्यस्माकमवगतिः।

*

**सन्दर्भाः–**


1. ऐतरेयब्राह्मणम्, 25.7
2. वाचस्पत्यम्, खण्ड - 6
3. शब्दकल्पद्रुमः, खण्ड - 3
4. अष्टाध्यायी, 3.3.57
5. तदेव, 8.4.14
6. माण्डूक्यकारिका, 8
7. तदेव, आगमप्रकरणम्
8. कठ-उपनिषद्, 1.2.15-17
9. छान्दोग्य-उपनिषद्, 1.1.1
10. गोपालतापनीयोपनिषद्, नृसिंहतापनीयोपनिषद् इत्यादौ।
11. श्रीमद्भगवद्गीता, 7.8
12. विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम्। प्रयोजनञ्च पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः।।
13. विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम्। सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः।।
14. न्यायदर्शनम्, 1.1.23
15. 'तस्य वाचकः प्रणवः'-योगसूत्रम् 1.27
16. ब्रह्मसूत्रम्, 1.2.19
17. श्रीओङ्कारनाथ-रचनावली (महारसायनम्), तृतीय खण्डः 13 स्पन्दनम्, पृ.53
18. ब्रह्मसूत्रम्, 1.2.19
19. तदेव, 1.2.20
20. तदेव
21. तदेव, 1.2.21
22. तदेव, 1.3.28
23. तत्रैव, 1.1-1
24. तदेव, ओङ्कारभाष्यम्
25. तदेव, 1.1.2
26. तदेव, ओङ्कारभाष्यम्
27. कठ-उपनिषद् 1.2.13
28. श्रीओङ्कारभाष्य-रचनावली, दशम खण्डः, पृ.3, 4
29. ब्रह्मबिन्दूपनिषद् 17
30. श्रीओङ्कारभाष्य-रचनावली, एकादश खण्डः, मातृगाथा, पृ.302

31. ब्रह्मसूत्रम्, 2.1.17
32. श्रीमद्भगवद्गीता, 4.9, प्रणवप्रेमपीयूष-भाष्यम्
33. तैत्तिरीय-उपनिषद् 2.7.1
34. योगतत्त्वोपनिषद्, 121
35. योगसूत्रम्, 1.27
36. शारदातिलकतन्त्रम्, प्रथम पटलः 7
37. श्रीओङ्कारभाष्य-रचनावली, दशम खण्डः, पृ.45
38. वाक्यपदीयम्, ब्रह्मकाण्डम्, 120
39. 'न केवलं भेदाग्रहे शब्दः कारणममपि तूत्पत्तावपीत्याह।' वाक्यपदीयम्, ब्रह्म-काण्डम्, 120
40. श्रीओङ्कारभाष्य-रचनावली, दशम खण्डः, पृ.46
41. तदेव
42. तदेव, पृ.144
43. छान्दोग्य-उपनिषद्, 3.13.7
44. श्लोकवार्त्तिकम्, प्रतिज्ञासूत्रम्, 12
45. नारदपरिव्राजक-उपनिषद्, अष्टम, उपदेशः, 1-7
46. सुधार-धारा, 2.7
47. प्रपन्न-पथिकः, भक्तिपथः, पृ.21
48. प्रणवप्रेमपीयूषभाष्यम्, पृ.254, गी. 28.65
49. तदेव
50. श्रीश्रीनादलीलामृतम्, पृ.42
51. योगसूत्रम्, 1.27

*

## किञ्चिद् रामायणीयम्

**सीताहरणात् विनिवर्तयितुकामस्य मारीचस्य रावणं प्रति केचन हितोपदेशाः–**

- सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
  अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।।
- त्वद्विधः कामवृत्तो हि दुःशीलः पापमन्त्रितः।
  आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः।।

**मारीचस्य दृष्ट्या रामः –**

- न कर्कशः
- न अविद्वान्
- विग्रहवान् धर्मः
- साधुः

**मारीचस्य दृष्ट्या सीता –**

- नरसिंहस्य सिंहोरस्कस्य तस्य रामस्य
  प्राणेभ्योऽपि प्रियतरा भार्या
- नित्यमनुव्रता
- दीप्तस्य हुताशस्य शिखा इव
- सुमध्यमा
- परदाराभिमर्शात्तु नान्यत् पापतरं महत्।
  प्रमादानां सहस्राणि तव राजन् परिग्रहे।।
- भव स्वदारनिरतः
  स्वकुलं रक्ष राक्षस।
  मानं वृद्धिं च राज्यं च
  जीवितं चेष्टमात्मनः।।

**रावणस्य दृष्ट्या नराधिपः –**

- राजभूतो हि धर्मश्च यशश्च जयतां वरः।
  तस्मान् सर्वास्ववस्थासु रक्षितव्या नराधिपाः।।

आधारः रामायणम्

अरण्यकाण्डम् 37-39 सर्गाः

# अर्थवत्सूत्रे अधातुग्रहणप्रयोजनम्

सौमित्र आचार्यः

## 1. उपोद्घातः

'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमि'त्यादिवचनात्सुविदितमेव सकलशास्त्रोपकारकत्वेनाभिमन्यमानं प्रकृतिप्रत्ययाद्यनुशासनेन साधुशब्दनिष्पादकं वेदस्य शिक्षाप्रभृतिषडङ्गेष्वन्यतममास्यस्थानापन्नं शास्त्रं हि व्याकरणम्। तत्र चानेकग्रन्थेषु मुख्यस्थानीयत्वेन जेगीयते साधुशब्दान्बुबोधयिषुणा महर्षिपाणिनिना प्रणीता अष्टाध्यायात्मिका अष्टाध्यायी। अष्टाध्याय्यामस्यां प्रथमाध्याये द्वितीयपादस्य पञ्चचत्वारिंशत्तमं प्रातिपदिकसंज्ञाविधायकं सूत्रम् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (अष्टा. 1.2.45) इति। 'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्।' इति 'इको यणचि'सूत्रस्थभाष्यवचनाद्विदितमेव पाणिनीयसूत्रेषु प्रत्येकमपि पदं कस्मैचित्प्रयोजनाय प्रयुक्तमिति। अतः अर्थवत्सूत्रेऽप्युपयुक्तानां तत्तत्पदानां प्रयोजनविषयिणी चर्चा परिलक्ष्यते विविधग्रन्थेषु। तत्र च अधातुग्रहणप्रयोजनमकारि काशिकाबृहच्छब्देन्दुशेखरादिग्रन्थेषु अहन् इत्यत्र नलोपो मा भूत्तदर्थमधातुग्रहणमिति। परन्त्विह अन्यथापि अहनित्यत्र नलोपधारणसम्भवात् अधातुग्रहणं न कार्यमिति अधातुग्रहणप्रयोजनं निराकारि उद्द्योतरत्नप्रकाशादिटीकासु इत्येवमधातुग्रहणप्रयोजनविषये मतिमतां मतवैचित्र्यं द्रष्टुं समुपलभ्यते। एतत्सर्वमिह निबन्धे यथामति प्रदर्श्य, तत्र चानयोर्मतयोः किं युक्ततरमिति सप्रमाणं निरूप्यते।

## 2. सूत्रार्थः

'अर्थवदधातुरप्रत्ययः प्रातिपदिकमि'ति पदचतुष्टयात्मकं संज्ञासूत्रमिदम्। अर्थोऽस्यास्तीत्यर्थे अर्थशब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' इति मतुपि अर्थवदिति पदं निष्पद्यते। अर्थवदिति नपुंसकलिङ्गानुसारेण शब्दस्वरूपमिति विशेष्यमध्याहार्यम्। अधातुरिति अप्रत्यय इति स तद्विशेषणम्। न धातुरधातुरिति नञ्तत्पुरुषः। धातुभिन्नमिति तदर्थः। न प्रत्ययः अप्रत्ययः इति नञ्तत्पुरुषः। अप्रत्यय इत्यावर्तते। तत्र प्रथमस्य प्रत्ययभिन्नं, द्वितीयस्य

च प्रत्ययान्तभिन्नमित्यर्थः। ततश्च धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्तभिन्नं च अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं भवतीति सूत्रार्थो लभ्यते। तथा चोक्तं सिद्धान्तकौमुद्यां – 'धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्''[2] इति। अव्युत्पन्ना डित्थडवित्थादिशब्दाः इहोदाहरणानि। एतेषां शब्दानामर्थवत्त्वात् धातुभिन्नत्वात् प्रत्ययप्रत्ययान्तभिन्नत्वाच्च प्रकृतसूत्रेण प्रातिपदिकसंज्ञा भवति।

### 3. अधातुग्रहणप्रयोजनविचारः

ननु 'अर्थवदधातुरप्रत्ययः प्रातिपदिकमि'ति सूत्रे अधातुरिति पदं किमर्थमिति जिज्ञासायां तत्र अधातुग्रहणस्य प्रयोजनं प्रदर्शितवन्तः नैके ग्रन्थकाराः। परन्तु कतिपये विद्वांसः तत्प्रयोजनं निराकुर्वन्ति। एवम् अधातुग्रहणप्रयोजनविषये विवदन्ते विद्वांसः। तथाहि –

### 3.1. अधातुग्रहणप्रयोजनवादिनः

अर्थवत्सूत्रे अधातुग्रहणस्य प्रयोजनं प्रोक्तवन्तः काशिकाप्रौढमनोरमाबृहच्छब्देन्दुशेखर-कृत्प्रभृतयः। अधातुग्रहणप्रयोजनविषये तेषां मतानि तावत् –

### 3.1.1. काशिकाकारमतम्

सूत्रेऽस्मिन्नधातुग्रहणप्रयोजनमकारि काशिकाकृद्भ्यामस्मिन्नेव सूत्रे – 'अधातुरिति किम्? हन्तेर्लङ् अहन् – नलोपो हि स्यात्'[3] इति। व्याख्यातश्चैतत्काशिकामतं तट्टीकयोः न्यासपदमञ्जर्योः प्रकृतसूत्रव्याख्याने–हन्–धातोः लङि तिपि शपि अदादित्वात् शपो लुकि 'इतश्चे'ति इकारलोपे अडागमे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण तकारलोपे अहन् इति रूपं भवति। तत्र 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः स्यात्, तन्मा भूदित्येवमर्थम् अधातुरिति पदम्। ननु चात्र प्रत्ययलक्षणेन अप्रत्ययः इति प्रतिषेधेन भवितव्यम्, तत् किमधातुग्रहणेन? नैतदस्ति। प्रातिपदिकसंज्ञायां नलोपः कार्यः। नलोपे च 'न ङिसम्बुद्ध्योः' इति प्रतिषेधो ज्ञापकः – प्रत्ययलक्षणेन अप्रत्ययः इति प्रतिषेधो न प्रवर्तत इति। यदि ह्यप्रत्यय इति प्रत्ययलक्षणेन हे राजन्नित्येवमादिषु प्रातिपदिकसंज्ञायाः प्रतिषेधः स्यात्, तर्हि 'न ङिसम्बुद्ध्योः' इति प्रतिषेधोऽनर्थकः स्यात्, प्राप्त्यभावात् इति।[4]

### 3.1.2. प्रौढमनोरमाकारमतम्

अर्थवत्सूत्रे अधातुरिति पदस्य सार्थक्यमदर्शि दीक्षितेन प्रौढमनोरमायाम् – अहन् इत्यत्र नलोपो मा भूत्तदर्थम् अधातुरिति पदम्। ननु कार्यकालपक्षे प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासात् प्रातिपदिकसंज्ञाभावेन नलोपो न स्यात् इति चेत्, तन्न वाच्यम्, 'न डिसम्बुद्ध्योः' इति निषेधेन ज्ञापितत्वात् प्रत्ययलक्षणेन उक्तपर्युदासाप्रवृत्तेः। अन्यथा

राजेत्यादौ नलोपः कथं स्यादिति।[5] एतत्प्रौढमनोरमामतमेव तत्त्वबोधिन्यामपि समाश्रितम्।

### 3.1.3. बृहच्छन्देन्दुशेखरकृन्मतम्

सूत्रेऽस्मिन् अधातुग्रहणप्रयोजनमदर्शि आचार्यनागेशेन बृहच्छब्देन्दुशेखरे – 'अधातुः किम्? अहन्। नलोपो मा भूत्। सुबुत्पत्तिस्तु नाऽपाद्या। भूवादयः इत्यस्य लविधौ, तिबादिविधौ चोपस्थितेर्निरवकाशतयाऽपवादैस्तिबादिभिर्बाधात्'' इत्यादिना। अत्रायम्भावः– ननु सूत्रेऽस्मिन् अधातुग्रहणं किमर्थमित्यत आह अहन् इत्यत्र नलोपे मा भूत्तदर्थं सूत्रे अधातुरिति पदम्। हन् – धातोः लङि तिपि शपि अदादित्वात् शब्लुकि 'इतश्चे'ति इकारलोपे अडागमे हल्ङ्याब्भ्यो दीर्घात्‌सुतिस्यपृक्तं हल्‍ इत्यादिना तकारलोपे अहन् इति भवति। सूत्रे अधातुरिति पदाभावे धातोः प्रातिपदिकसंज्ञायां सत्यां तिङां स्वाद्यपवादत्वात् अहन् इत्यत्र तिङि उत्पन्ने लुप्ते च प्राक् कृता प्रातिपदिकसंज्ञा नापगतेति 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपः प्रसज्येत। तन्मा भूदित्येतदर्थं सूत्रे अधातुरिति पदम्।

ननु धातोः प्रातिपदिकसंज्ञायां ततः सुबुत्पत्तिः वक्तव्या, द्वयोः संज्ञयोराकडारीयत्वाभावेन समावेशेऽपि परत्वात् सुब्विधायकशास्त्रस्यैव तत्प्रवृत्तेः। लडादीनां पुत्रीयति, श्येनायते इत्यादौ सावकाशत्वम्, 'भूवादयो धातवः' इति धातुसंज्ञाया अपि श्रियौ इत्यादौ इयङादिसम्पादकत्वेन चारितार्थ्यमिति। तथा च नलोपमात्रस्य फलत्वेन प्रदर्शनं न युक्तमित्यत आह धातोः प्रातिपदिकसंज्ञायां ततः सुबुत्पत्तिस्तु नापाद्या। कारणं हि धातुभ्यः सुबादीनामुत्पत्तौ तिप्तस्झीत्यादिसूत्राणां निरवकाशत्वं भवेत्। ततश्च तिप्तस्झीति सूत्रं स्वादीनामपवादः स्यादिति अपवादत्वात् धातुभ्यः तिङादय एव प्रत्ययाः भविष्यन्ति, न तु सुबादयः।

ननु 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणमाश्रित्य प्रत्ययान्तत्वेन पर्युदासात् प्रातिपदिकत्वं नास्ति। तेन प्रातिपदिकसंज्ञाभावेन अहन् इत्यत्र नलोपो न स्यादिति किमधातुग्रहणेन इति चेत्, तन्न वाच्यम्। यतो ह्यत्र प्रत्ययलक्षणेन उक्तपर्युदासो न प्रवर्तते। तत्र च ज्ञापकं 'न ङिसम्बुद्ध्योः' इति निषेधः। तथाहि प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासस्य प्रवृत्तौ हे राजन् इत्यत्रापि प्रत्ययलक्षणेन प्रत्ययान्तत्वात् प्रातिपदिकत्वं न स्यात्। ततश्च प्रातिपदिकत्वाभावे सति नलोपस्य अप्रसक्तौ तस्य निषेधार्थं 'न ङिसबुद्ध्योः' इति सूत्रं व्यर्थं स्यात्। तेन 'न ङिसम्बुद्ध्योः' इति निषेधात् प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासो न प्रवर्तते इति विज्ञायते। अन्यथा प्रत्ययलक्षणेन पर्युदासस्य प्रवृत्तौ राजेत्यादौ कथं नलोपः स्यात्।

ननु राजन्–शब्दस्य कनिन्प्रत्ययान्ततया कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां राजेत्यादौ नलोपः स्यात् इति चेन्न, 'कृत्तद्धितसमासाश्च' इति सूत्रेऽपि

अप्रत्ययः इत्यस्य सम्बन्धात्। तत्रापि अप्रत्ययः इत्यस्य सम्बन्धादेव तद्धितान्तदाक्षिशब्दाद् औविभक्तौ पूर्वसवर्णदीर्घे दाक्षी इत्यत्र पूर्वान्तवद्भावेन तद्धितान्तत्वमादाय, एवं कृदन्तदिदृक्षु शब्दात् औविभक्तौ पूर्वसवर्णदीर्घे दिदृक्षू इत्यत्र पूर्वान्तवद्भावेन कृदन्तत्वमादाय प्रातिपदिकत्वात् परादिवद्भावेन सुपः 'सुपो धातुप्रातिपदिकयोः' इति लुक् न भवति। तेन दाक्षी, दिदृक्षू इत्यादौ न दोषः। अप्रत्ययः इत्यस्य असम्बन्धे तु पूर्वान्तवत्त्वेन लब्धतद्धितान्त-कृदन्तत्वेन प्रातिपदिकसंज्ञायां तदवयवतया ईकारादौ परादिवद्भावेन सुप्त्वमादाय 'सुपो धातुप्रतिपदिकयोः' इति लुगापत्तिः स्यात्।

ननु प्रत्ययान्तपर्युदासे कार्ये सुब्लोपनिमित्तप्रत्ययलक्षणं न भवतीति सुब्लोपविषयमेव ज्ञापकम्। एवञ्च अहनित्यत्र तिङ्लोपनिमित्तप्रत्ययलक्षणं दुर्वारम् इति। तेन प्रत्ययान्तपर्युदासात् प्रातिपदिकत्वाभावेन नलोपो न भवतीति सूत्रे अधातुग्रहणं व्यर्थमिति चेत्, तन्न। यतोहि असति बाधके प्रमाणानां सामान्ये पक्षपातः इत्यर्थस्यापि तेन ज्ञापनं भवति। अन्यथा सूत्रोपस्थितिविशेषमादाय ङिसम्बुद्धिमात्रविषयकमेव ज्ञापकं स्यात्। ततश्च राजपुरुषः इत्यादौ पूर्वपदस्य प्रत्ययलक्षणेन प्रत्ययान्ततया प्रातिपदिकत्वानापत्तौ नलोपानापत्तिः स्यात्, तत्र ङिस्वोरभावात्।

ज्ञापकानां सजातीयापेक्षत्वमङ्गीकृत्य स्वविषये चारितार्थ्यमितीयं रीतिः 'सार्वधातुकमपित्' इत्यत्र भाष्ये[7] स्पष्टा वर्तते। तत्र हि सार्वधातुकपदस्य प्रयोजननिरूपणावसरे तदभावे कर्ता हर्ता इत्यादौ तृजादेरपि ङित्त्वप्राप्तिशङ्काया आर्धधातुकेषु चङ्ङादिषु ङित्करणरूपज्ञापकेन निराकरणं कृत्वा सजातीयापेक्षत्वेन धातुभ्यो विहिताः ये प्रत्ययाः तद्विषयकत्वशङ्कां सार्वधातुके अव्याप्त्यापत्त्या आर्धधातुकत्वेन साजात्यमादाय नियमकरणेन निरस्य यद्येवं कल्प्यते तदा चङङौ लुग्विकरणानां ज्ञापकौ, नजिङ् वर्तमानकालानाम् अथ डौणादिकानां नङ्शब्दो घञर्थानां ज्ञापको भविष्यति। तथा च तृजादेर्ङित्त्वापत्तिरिति सार्वधातुकग्रहणं कर्तव्यम् इति प्रतिपादितम्। एवञ्च यथा बाधकत्वात् तत्र सामान्यापेक्षत्वं न भवति, किन्तु विशेषापेक्षत्वेन चारितार्थ्यम् इत्युक्तम्, तथा अत्रापि बाधकसत्त्वे विशेषापेक्षत्वं तदभावे तु सामान्यापेक्षत्वं भविष्यति इति। तेन सुब्लोपविषयमेव ज्ञापकमिति नास्ति।

एतेन 'लोपविषयमेव तज्ज्ञापकम्' इति केषाञ्चिन्मतमपि अपास्तम्। अत एव 'इत्थंभूतलक्षणे' इति सूत्रे कमण्डलुपाणिम् इति बहुव्रीहिसमासे कमण्डलुशब्दात् तृतीयापादानं भाष्यकैयटोक्तं सङ्गच्छते। तथाहि – 'इत्थम्भूतलक्षणे' इति सूत्रे इत्थम्भूतलक्षणे तत्स्थे प्रतिषेधो वक्तव्यः। अन्यथा 'अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीत्' इत्यत्र कमण्डलुपाणिम् इति बहुव्रीहौ कृते कमण्डलुशब्दात् तृतीया प्राप्नोति। न च प्रत्ययलक्षणेन अप्रत्यय इति

प्रातिपदिकसंज्ञानिषेधः, 'न ङिसम्बुद्ध्योः' इति नलोपप्रतिषेधाज्ज्ञापकात् इति। इत्थं कमण्डलुपाणिमित्यत्र कमण्डलुशब्दात् तृतीयापत्तिः भाष्ये प्रदीपे च दर्शिता।[8] तत्र 'न ङिसम्बुद्ध्योः' इति ज्ञापकं लोपविषयमेवेति स्वीकारे तु कमण्डलुपाणिमित्यत्र कमण्डलुशब्दे प्रत्ययलक्षणमाश्रित्य प्रत्ययान्तपर्युदासेन प्रातिपदिकत्वाभावेन तृतीयावारणसम्भवात् पुनः तृतीयापादानरूपं भाष्यकैयटकथनमसङ्गतं स्यात्। अतः लोपविषयमेव तज्ज्ञापकम् इति वचनमपास्तम्।

एवञ्च अहन् इत्यत्र 'न ङिसम्बुद्ध्योः' इति निषेधेन ज्ञापितत्वात् प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासस्याप्रवृत्तेः अप्रत्ययान्तत्वात् प्रातिपदिकत्वे 'न लोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपापत्तिः स्यात्। तन्निवृत्त्यर्थमधातुग्रहणमिति बृहच्छब्देन्दुशेखरकृन्नागेशाभिप्रायः।

किञ्च अहनित्यत्र नलोपनिवृत्त्यर्थमधातुग्रहणम् इत्येतच्छब्देन्दुशेखरमतमेव सिद्धान्तकौमुद्या बालमनोरमालक्ष्मीटीकादिष्वपि समाश्रितम्। एवमर्थवत्सूत्रे अधातुग्रहणप्रयोजनं प्रतिपादितवन्तः स्वस्वरीत्या काशिकाप्रौढमनोरमाबृहच्छब्देन्दुशेखरकृत्प्रभृतयः।

### 3.2. अधातुग्रहणप्रयोजननिराकरणवादिनः

परन्त्विह अर्थवत्सूत्रे विनाप्यधातुग्रहणम् अहनित्यत्र नलोपवारणं सम्भवतीति अधातुग्रहणं न कर्तव्यमिति अधातुग्रहणप्रयोजनं निराकारि उद्द्योतरत्नप्रकाशचन्द्रकलादिटीकासु। तेषाञ्च मतानि तावत् –

अर्थवत्सूत्रस्य भाष्ये अप्रत्ययग्रहणप्रयोजनावसरे – "अप्रत्यय इति शक्यमवक्तुम्। कस्मान्न भवति काण्डे कुड्य इति। कृत्तद्धितग्रहणं नियमार्थं भविष्यति – कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति, नान्यस्य"[9] इत्युक्तम्। तत्र चोक्तं कैयटेन प्रदीपटीकायां यद्यपि कृत्तद्धितग्रहणमित्युक्तं तथापि तद्धितग्रहणमत्र नियमार्थम्, कृद्ग्रहणं तु प्रतिषिद्धार्थं भिद् छिद् इति। अत्र ह्यधातुरिति प्रतिषेधप्रसङ्ग इति। तस्य च व्याख्यानावसरे नागेशेनोद्द्योते उदितम् – 'वस्तुतो धातोः प्रत्ययान्तस्य च चेत्कृत्तद्धितान्तस्यैवेति नियमे भाष्यतात्पर्यं, तेनाधातुग्रहणमपि प्रत्याख्यातम्' इति एतेन अहन् इत्यत्र 'धातोः प्रत्ययान्तस्य च चेत्कृत्तद्धितान्तस्यैवे'ति नियमेनैव प्रातिपदिकत्ववारणसम्भवात् अधातुग्रहणं न कर्तव्यमिति।

रत्नप्रकाशकारोऽप्यस्मिन्सूत्रे अधातुग्रहणं न कार्यमिति अधातुग्रहणप्रयोजनं प्रत्याचख्यौ। तथाहि – अहन् इत्यत्र प्रत्ययलक्षणेनापि प्रत्ययान्तस्य 'कृत्तद्धितान्तस्येव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति, नान्यस्य' इत्यनेन नियमेन वारणं भवति। तेन प्रातिपदिकसंज्ञाभावात् अधातुग्रहणमपि व्यर्थम्। हन्ति इत्यादौ तिङ्प्रकृतेः हन् इत्यादेः प्रातिपदिकसंज्ञायां तु न

हि किञ्चिद् दूषणमस्ति। तेन अधातुरिति पदं सुत्यजम्। ननु प्रत्ययलक्षणेन प्रत्ययान्तत्वात् राजेत्यादौ नलोपो न स्यादिति चेन्न, 'न ङिसम्बुद्ध्योः' इति निषेधेन लोपे कर्तव्ये प्रतिषेधाभावज्ञापनात्। पुनः तेन ज्ञापकेन प्रत्ययलक्षणप्रयुक्तपर्युदासाभाव एव ज्ञापनीय इति तु न वाच्यम्, ज्ञापकस्य सजातीयापेक्षत्वेन नलोपे कर्तव्ये सुबन्तस्यैव प्रत्ययलक्षणेन अप्रत्ययः इति पर्युदासो नेति ज्ञापनौचित्यात्। एतेन ''तद्धितग्रहणमत्र नियमार्थम्, कृद्ग्रहणं तु प्रतिषिद्धार्थम् – भिद्, छिद् इति। अत्र हि अधातुः इति प्रतिषेधप्रसङ्गः'' इति कैयटवचनं निरस्तम्। अधातुग्रहणसार्थक्यस्यापि भगवतैवोक्तत्वात् इति।[11]

'कृत्तद्धितसमासासश्च' इति सूत्रस्य व्याख्यानावसरे लक्ष्मीटीकाकृताप्यवादि – वस्तुतस्तु प्रत्ययपर्युदासमात्रमाश्रित्य तद्धितग्रहणेन प्रत्ययान्तस्य प्रातिपदिकत्वं चेत्तद्धितान्तस्यैवेति नियममाश्रित्य च प्रत्ययान्तपर्युदासः प्रत्याख्यातो भाष्यकृता। तथा च अहन् इत्यादौ नियमेनैव प्रातिपदिकत्ववारणं सम्भवतीति धातुग्रहणप्रत्ययाख्यानमपि भवगता सूचितमेव इति।[12] लघुशब्देन्दुशेखरस्य चन्द्रकलायामप्येतदाचष्ट – 'धातोः प्रत्ययान्तस्य च चेत्कृत्तद्धितान्तस्यैव' इति नियमाकारे भाष्यतात्पर्यं वर्तते। एवञ्चाधातुग्रहणमपि न कार्यम् इति।'[13]

एवञ्च अहन् इत्यत्र नियमेनैव प्रातिपदिकत्ववारणसम्भवात् अधातुग्रहणं न कर्तव्यमिति अधातुग्रहणप्रयोजनं निराचक्रिरे उद्द्योतरत्नप्रकाशटीकाकारादयः।

## 4. समीक्षणम्

वस्तुतस्त्विह अधातुग्रहणप्रयोजनं प्रतिपादयतां काशिकाप्रौढमनोरमाबृहच्छब्देन्दुशेखर-कारादीनां मतं समुचितं प्रतिभाति। अधातुग्रहणं न कर्तव्यमिति प्रतिपादयताम् उद्द्योतरत्नप्रकाशकारादीनां मतं तु न समीचीनम्। तत्र च कारणानि तावत् –

अत्र 'धातोः प्रत्ययान्तस्य च चेत्कृत्तद्धितान्तस्यैवे'ति नियमाश्रयणेन अधातुग्रहणप्रत्या-ख्यानापेक्षया सूत्रे अधातुरिति पदोपादानमेव श्रेयः। यतोहि अत्र ज्ञापकेन नियमकथनं गौरवं भवति, तदपेक्षया तु सूत्रे पदोपादानमेव लाघवमिति मे मतिः।

पुनः कार्यकालपक्षे अधातुग्रहणप्रत्याख्यानं भाष्ये सूचितम्, यथोद्देशपक्षे तु अधातुग्रहण-मपेक्ष्यते एव। तथा प्रोक्तं लक्ष्मीटीकायां कृत्तद्धितसूत्रस्य व्याख्यानावसरे – वस्तुतस्तु प्रातिपदिकसंज्ञायाः आकडारीयत्वाभावेन धातुसंज्ञासमकालमेव प्राप्त्या तद्वारणाय अधातुः इति पदोपादानम्। कार्यकालपक्षमादाय तत्प्रत्याख्यानं भाष्ये सूचितम्। धातुसंज्ञायाः निरवकाशत्वं तु न भवति धुक्, भुवौ इत्यादौ घत्वोवङादिसम्पादनाय तच्चारिताथ्र्यात्, कार्यकालपक्षे तत्र प्रातिपदिकसंज्ञायाः फलाभावेन अप्रवृत्तेः इति।[14]

यत्तु रत्नप्रकाशकारेण 'न ङिसम्बुद्ध्योः' इति ज्ञापकस्य सजातीयापेक्षत्वेन नलोपे कर्तव्ये सुबन्तस्यैव प्रत्ययलक्षणेन अप्रत्ययः इति पर्युदासो नेति ज्ञापनौचित्यात् इत्युक्तं तदप्युक्तम्। यतोहि 'असति बाधके प्रमाणानां सामान्ये पक्षपातः' इत्यर्थस्यापि तेन ज्ञापनं सम्भवति। अन्यथा 'न ङिसम्बुद्ध्योः' इति सूत्रोपस्थितविशेषमादाय ङिसम्बुद्धिविषयकमेव तत् स्यात्। तेन च राजपुरुषाऽसिद्धिः भवेत्। इत्येतत्प्रतिपादितं बृहच्छब्देन्दुशेखरे,तच्च पूर्वमुक्तमेव।

अपि चैतत् प्रौढमनोरमायाः लघुशब्दरत्नटीकायामप्यवादि – ''न च सुब्लोपविषयमेव ज्ञापकम्। असति बाधके प्रमाणानां सामान्ये पक्षपातः इत्यर्थस्यापि ज्ञापनात्। अन्यथा सूत्रोपस्थितविषयता स्यादिति राजपुरुषासिद्धिः। स्पष्टा चेयं रीतिः 'सार्वधातुकमपित्' इत्यत्र भाष्ये। प्रकृतसूत्रभाष्ये चेदं स्पष्टम्''[15] इति। एतेन अधातुग्रहणं न कार्यमिति अधातुग्रहण-प्रयोजनं निराकुर्वन्तः उद्योतरत्नप्रकाशकारादयः परास्ताः।

किञ्च अशेषशेमुषीसम्पन्नेन महाभाष्यकारेण साक्षादेव अधातुग्रहणप्रयोजनमभाणि अर्थवत्सूत्रे पदकृत्यकथनावसरे। अधातुरिति किमर्थम्? अहन् वृत्रम् इत्यत्र नलोपो मा भूत् इति। ननु अधातुरिति वक्तुमशक्यम्, यतोहि 'सुपो धातुप्रातिपदिकयोः' इत्यत्र आचार्यः यत् धातुग्रहणं करोति, तेन ज्ञापयति – न धातोः प्रातिपदिकसंज्ञा भवतीति। परन्तु नैतदस्ति ज्ञापकम्। प्रतिषिद्धार्थमेतत् स्यात्। अप्रत्ययः इति प्रत्ययान्तस्य निषिद्धायां प्रातिपदिकसंज्ञायाम् 'अपि काकः श्येनायते' इत्याद्यर्थं 'सुपो धातुप्रातिपदिकयोः' इति सूत्रे धातुग्रहणमावश्यकम्। अतः धातुत्वात् 'सुपो धातुप्रतिपदिकयोः' इति सुपो लुक् भवति। तस्मात् श्येनायते इत्यादौ प्रत्ययान्ते धातुग्रहणस्य चारितार्थ्येन ज्ञापकत्वासम्भवात् अर्थवत्सूत्रे अधातुरिति पदमावश्यकम् इति।[16]

भाष्यमाश्रित्य शब्दकौस्तुभेऽपि अधातुग्रहणप्रयोजनमभाणि भट्टोजिदीक्षितेन – ''अधातुः किम्? अहन् । नलोपो मा भूत्। न च 'सुपो धातु' इति धातुग्रहणात् धातोर्नेयं संज्ञेति वाच्यम्, श्येनायते इत्यादौ प्रत्ययान्ते धातुग्रहणस्य चरितार्थत्वात्''[17] इति। एतेन अहन् इत्यत्र नलोपनिवृत्त्यर्थम् अधातुग्रहणमिति।

### 5. उपसंहृतिः

एवञ्च अहन् इत्यत्र 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपः स्यात्, तन्निवृत्त्यर्थम् अर्थवत्सूत्रे अधातुग्रहणमिति काशिकाप्रौढमनोरमाबृहच्छब्देन्दुशेखरकारादीनां मतं समुचितम्। अत्र अधातुग्रहणप्रयोजननिरूपणावसरे सर्वैर्विद्वद्भिः स्वस्वग्रन्थे भिन्नो भिन्नः प्रकारः

आश्रितो वर्तते। तथाहि – भाष्यादौ 'सुपो धातुप्रातिपदिकयोः' इत्यत्र धातुग्रहणेन धातोः प्रातिपदिकसंज्ञा न भवतीति ज्ञापकेन अधातुग्रहणं नावश्यकमित्याशङ्क्य तत्र च श्येनायते इत्यादौ धातुग्रहणस्य चारितार्थ्यमित्यादिना निराकृत्य अधातुग्रहणाभावे अहन् इत्यत्र नलोपापत्तिः दर्शिता। बृहच्छब्देन्दुशेखरलघुशब्दरत्नादौ च अहन् इत्यत्र प्रत्ययलक्षणमाश्रित्य प्रत्ययान्तपर्युदासात् न प्रातिपादिकत्वमिति नलोपाभावमाशङ्क्य तत्र 'न ङिसम्बुद्ध्योः' इति निषेधेन ज्ञापितत्वात् प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासो न प्रवर्तते इत्यादिना निराकृत्य अधातुग्रहणाभावे अहन् इत्यत्र नलोपापत्तिः दर्शितेति। एवमेतेषां निरूपणप्रकारस्य भिन्नत्वेऽपि सिद्धान्तस्त्वभिन्न एवेति अहन् इत्यत्र नलोपनिवृत्त्यर्थम् अर्थवत्सूत्रे अधातुग्रहणमिति शम्।

*

**सन्दर्भाः–**


1. व्याकरणमहाभाष्यम् (पद्यखण्डम्), पृ.78
2. सिद्धान्तकौमुदी (प्रथमभागः), पृ.173
3. काशिका (प्रथमभागः), पृ.296
4. काशिका (प्रथमभागः), न्यासपदमञ्जर्यौ, पृ.296
5. प्रौढमनोरमा, पृ.343
6. बृहच्छब्देन्दुशेखरः (प्रथमभागः), पृ.327
7. व्याकरणमहाभाष्यम् (द्वितीयखण्डम्), पृ.5
8. व्याकरणमहाभाष्यम् (द्वितीयखण्डम्), पृ.503
9. व्याकरणमहाभाष्यम् (द्वितीयखण्डम्), पृ.43
10. व्याकरणमहाभाष्यम् (द्वितीयखण्डम्), उद्द्योतः, पृ.43
11. महाभाष्यप्रदीपव्याख्यानानि (चतुर्थभागः), रत्नप्रकाशः, पृ.55
12. वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), लक्ष्मीटीका, पृ.251
13. लघुशब्देन्दुशेखरः (प्रथमभागः), चन्द्रकला, पृ.217
14. वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), लक्ष्मीटीका, पृ.251
15. प्रौढमनोरमा (प्रथमभागः), लघुशब्दरत्नम्, पृ.348
16. व्याकरणममहाभाष्यम् (द्वितीयखण्डम्), पृ.42
17. शब्दकौस्तुभः (द्वितीयभागः), पृ.30


*